ACCOUNT (subs.) : I. Of money : गणना, *a. book* गणनापत्रिका, Raj. ; *balancing an a.* गणनामेकीकृत्य, Raj. ; *render an a. for me* मदर्थं गणनां कुरु.—II. Estimation : q. v. गणना.—III. Importance, value, advantage : q.v.—IV. A narrative or description : q.v. : (1) विवरणम् ; (2) विवृतिः.—V. Reason, consideration : q.v. : Ph. *on this a.* अतः ; *on what a.* किमर्थम् or किन्निमित्तम् ; *on no a.* न कथञ्चन ; *on all a.s* सर्व्वथा.

ACCOUNT OF, ON : (1) by the abl. : *on a. of having no power* अप्रभुत्वात्, D. ; (2) sometimes by the ins., especially if the word ends in ता,

on a. of my childhood बालतया, K. ; (3) by-निमित्त: (त्ता, त्तं), *as we are reduced to this state on a. of the enemy* द्विषन्निमित्ता यदियं दशा, Ki. I. 41. : V. FOR, FROM, FOR THE SAKE OF.

ACCOUNT (v.t.) : गणयति (गण्, c. 10.) : V. TO CONSIDER, ESTEEM.

ACCOUNT FOR : I. To assign the cause of : कारणं दर्शयति, प्र॰ (c. of दृश्) (with gen.) : V. TO EXPLAIN. II. To render an account : Ph. *a. for the money received* * यद्धनं प्राप्तं तस्य गणनां देहि.

ACCOUNTABLE. : Ph. *I apprehend you are a. for his death.* * त्वद्दोषात्तस्य मरणमाशङ्के ; *every one is a. to God for his conduct* * सर्वैरीश्वराया-त्मकार्याणां न्यायान्यायौ प्रदर्शयितव्यौ.

ACCOUNTANT : perh. गणक: ; *chief a., a.- general* गणनाध्यक्ष:, Raj.

ACCOUTRE (v.t.) : सं-नह्यति (नह्, c.4.) : V. TO EQUIP, ARM.

ACCOUTREMENT (1) सन्नाह: ; (2) सज्जा : V. ARMS, EQUIPMENT.

ACCREDIT (v.). : I. To trust : q.v. : वि-श्वसिति (श्वस्, c.2.).—II. To send with credentials : प्र-हिणोति (हि, c.5.) : V. TO SEND.

ACCRETION : (1) उपचय: ; (2) वृद्धि:.

ACCRUE (v.i.) : V. TO RESULT ; ALSO TO AUGMENT.

ACCUMULATE (v.t.) : (1) सं-चिनोति, समा-, प्र-, (चि, c.5.) ; (2) सं-बिभर्त्ति (भृ c.3.) ; (3) सं-गृह्णाति (ग्रह्, c.9.) ; (4) राशीकरोति, पुञ्जीकरोति etc. (= to amass).

ACCUMULATE (v.i.) : (1) उपचीयते (pass.) ; (2) वर्धते (वृध्, c.1.) ; (3) स्फीत: (ता, तं.) भवति.

ACCUMULATION : (1) सञ्चय: ; (2) सङ्ग्रह: ; (3) सम्भृति:.

ACCURACY :(1) विशुद्धत्वम् ; (2) विशुद्धि. :.V. CORRECTNESS, NICETY.

ACCURATE : विशुद्ध: (द्धा,द्धं) : V. CORRECT, EXACT, CAREFUL.

ACCURATELY : विशुद्धम् : V. CORRECTLY, EXACTLY.

ACCURSED : (1)- हतक: (का, कं), *the a. moon* चन्द्रहतक:, K. ; (2) दग्ध: (ग्धा, ग्धं), *the a. saint* दग्धसिद्ध:, D. VII. : V. DETESTABLE, EXECRABLE.

ACCUSATION : (1) अभियोगः ; (2) अपवादः, *made a false a. against her husband* भर्त्तुर्मिथ्यापवादमभिहितवती, Vet. ; (3) अभिशापः (=false a.).

ACCUSATIVE CASE : (1) कर्म्मकारकम् ; (2) कर्म्मन् (n.).

ACCUSATORY (adj.) : i. e. containing an accusation : अपवादगर्भः (र्भा, र्भम्).

ACCUSE (v. t.) : (1) अभि-युनक्ति (युज्, c. 7.), *that I go like an a.d man* अभियुक्त इव प्रयामि, Mr. IX. ; (2) अप-वदति (वद्. c. 1.) : v. TO CALUMNIATE.

ACCUSER : (1) अभियोक्तृ (f. त्री) ; (2) अभियोगिन् (f. नी) (rare.)

ACCUSTOM : (1) परिचयं करोति, *a.ed himself in shooting moveable objects* परिचयं चललक्ष्यनिपातने...करोति, R. IX. 49. ; (2) अभ्यसति (अस्, c. 4) V. TO PRACTISE. Ph. : *he who is a.ed to good food* * यः सर्व्वदा भोजनविशेषैराहारं करोति ; *a.ed to cheating* वञ्चनापरः (रा, रं).

ACE : of cards : *टेक्का. Ph. : *within an a. of piercing* : *अल्पेन वेद्धुं न शशाक.

ACCERBITY : कटुता (lit. and fig.) : v. SOURNESS.

ACHE (subs) : (1) पीडा ; (2) वेदना ; (3) व्यथा : v. HEAD-A. ETC.

ACHE (v. i.) : (1) व्यथते (व्यथ्, c. 1.) ; (2) पीड्यते (p. of पीड्). Ph. : *my head a.s* शिरोवेदना मां बाधते, Mu. III.

ACHIEVE (v. t.) : (1) साधयति (c. of सिध्) ; (2) निष्पादयति (c. of पद्) : v. TO ACCOMPLISH.

ACHIEVEMENT : I. Exploit : q. v. : (1) अवदानम्, *measured by your a.* अवदानसम्मिता, Sa. VII ; (2) कर्म्मन् (n) v. DEED II. In heraldry : v. ESCUTCHEON.

ACHROMATIC : * अवर्णः (र्णा, र्णम्) : *a. telescope* * अवर्णदूरवीक्षणं येन तेजोबिम्बे येण रक्तपीताद्यादिमवर्णो न दृश्यते.

ACID : I. adj. : अम्लः (म्ला, म्लं).—II. Subs. : अम्लः.

ACIDITY : (1) अम्लता ; (2) अम्लत्वम्. *A. of stomach* अम्लपित्तः.

ACIDULOUS : ईषदम्लः (म्ला, म्लं) (?)

ACKNOWLEDGE (v. t.) : (1) अभ्युप-एति (इ, c. 2.), *she a.d defeat from me* मत्तः पराजयोऽभ्युपेतः, D. II.; (2) अभ्युप-गच्छति (गम्, c. 1.): *I a. I am just so* अभ्युपगतं तावदस्माभिरेवंविधा एव वयं, Sa. v.; (3) स्वीकरोति, D. s.; (4) अङ्गीकरोति, *if one would not a. the authority of inference* यदि कश्चित्प्रामाण्यमनुमानस्य नाङ्गीकुर्यात्, D. s.; (5) प्रतिपद्यते (पद्, c. 4.), M. VIII. 183.

ACKNOWLEDGEMENT : (1) स्वीकारः ; (2) अभ्युपगमः ; (3) अभ्युपायः ; (4) अङ्गीकारः.

ACME : परा कोटिः : *the a. of joy* परां कोटिमानन्दस्य, K.

ACONITE : a poison : वत्सनाभः.

ACORN : i. e. the fruit of the oak : v. OAK.

ACOUSTIC : (1) श्रौतः (ती, तं) ; (2) comp. with श्रोत्र-.

ACOUSTICS : * शब्दविद्या.

ACQUAINT (v. t.) : I. To make familiar : परिचयं करोति (कृ, c. 8.), आ-चरति (चर्, c. 1.), *making himself a.ed with all sciences* सर्वविद्यापरिचयमाचरतः, K.—II. To inform : q.v. : बोधयति, अव-,(c. of बुध्), *you should keep me a.ed with whatever happens there everyday* प्रत्यहञ्च यद्यत्तत्र वृत्तान्तं जातं तदखिलं त्वयावबोध्यः, D. III.

ACQUAINTANCE : I. Familiar knowledge : (1) परिचयः, *out of respect for his a. with all practical arts* सकलकलाकलापपरिचयबहुमानेन, K. ; (2) संस्तवः (*rare*) : v. KNOWLEDGE, INTIMACY. II. A person known : (1) परिचितः (ता, तं), *like old a.s* चिरपरिचितानिव, D. III. ; (2) संस्तुतः (ता, तं) Ki. III. 2.

ACQUAINTED WITH : अभिज्ञः (ज्ञा, ज्ञं) (with gen.), *I am not a. with such affairs* एवंविधानां वृत्तान्तानामनभिज्ञास्मि, K. : Ph. *we are not a. with love affairs* अनभ्यन्तरा खलु वयं मदनगतस्य वृत्तान्तस्य, Sa. III.

ACQUIESCE : v. TO ASSENT, ABIDE BY, CONTENT WITH.

ACQUIESCENCE : सम्मतिः : v. ASSENT.

ACQUIRE (v. t.) : (1) अर्जति, उप-, (अर्ज्, c. 1.) or commonly, उपार्ज्जनं करोति (with gen.); (2) अधि-गच्छति (गम्, c. 1.), *to a. fame* यशोधिगन्तुम्, Ki. III. 40. V. TO GAIN, OBTAIN.

ACQUIREMENT : I. The act of acquiring : (1) अर्जनम्, उपार्जनम्, *by the a. of knowledge* विद्योपार्जनेन, P. I. p. ; (2) अधिगमः ; (3) लाभः ; (4) अवाप्तिः.—II. Of knowledge : V. ATTAINMENT (III.) [V. GAIN.

ACQUISITION : I. Acquirement : q. v. II. The thing acquired लाभः

ACQUIT (v. i.) (1) मुञ्चति (मुच्, c. 6.) ; (2) मोचयति (c. of मुच्) ; (3) निस्तारयति (c. of तृ) (?).

ACQUIT ONESELF : आ-चरति (चर्, c. 1.) : V. TO CONDUCT.

ACQUITTAL : (I) मुक्तिः ; (2) मोचनम्; (3) मोक्षः. [q. v.

ACQUITTANCE : I. Of debt : (1) परिशोधः ; (2) निर्यातनम्.—II. A receipt

ACRE : भूमानविशेषः.

ACRID (adj.) : कटुः (ट्वी, टु) : V. PUNGENT, SHARP, ACRIMONIOUS.

ACRIMONIOUS : (1) कटुः (ट्वी, टु) ; (2) उग्रः (ग्रा, ग्रं) ; (3) प्रखरः (रा, रं).

ACRIMONIOUSNESS, ACRIMONY : (1) कटुत्वम् ; (2) प्राखर्यम् ; (3) उग्रत्वम्.

ACROSS (adv.) : (1) व्यत्यस्तः (स्ता, स्तं) ; (2) कोणाकोणि (?).

ACROSS (prep.) : Ph. *I will go a. the river.* नदीपारं गमिष्यामि ; *a bridge has been laid a. the Son* * शोणस्योपरि सेतुर्बबन्धे.

ACROSTIC :- nearest word चित्रं काव्यम्, Kav. i. 8. ; * आद्याक्षरबन्धः

ACT (v. t.) : I. To do, perform : q. v. II. On the stage : (1) अभिनयति (नी, c. 1.), Sa. 1 ; (2) प्र-योजयति (युज्, c. 10.), *we should a. Malabikagnimitra in this spring festival* मालविकाग्निमित्रमस्मिन्वसन्तोत्सवे प्रयोक्तव्यम्, Mal. ; (3) नाटयति (नट्, c. 10.), Ma. 1. : Ph. *Urbashi a.ing the part of Laksami.* लक्ष्मीभूमिकायां वर्तमानोर्वशी V. iii. N. B. The sense of a.ing is often expressed by nomi. v. s. : *a. the nymph* अप्सरायते.

ACT (v. i.) : I. To be in action : करोति (कृ, c. 8.) : *this is not possible that one a.s and another enjoys* न ह्येतत् सम्भवित्यन्यः करोत्यन्यः भुङ्क्त इति,

D. s.—II. To conduct oneself : (1) आचरति (चर्, c. 1.) : *the king has a.ed very ungentlemanly towards Sakuntala* तेन राज्ञा शकुन्तलायामनार्यमाचरितम्, Sa. IV. V. TO BEHAVE : (2) by nominal verbs : *to a. as a step-mother* सपत्नायते ; *to a. as a tutor* गुरूयते ; *to a. like yourself* त्वयते. —III. On the stage : अभिनयति (नी, c. 1.) V. ACT. (v. t.) (II)

ACT (subs.) :-I. A deed : q. v. : (1) कर्मन् (n.) ; (2) क्रिया ; (3) कृतम्.—II. A division of a play : अङ्क (mn.)—III. A law : * विधिः Ph. : *the last act of life* : (जीवनस्य) चरमदशा.

ACTION : I. Agency : often not expr : *water boils by the a. of heat* * वारि तपति तापेन. Ph. *the a. of the senses* इन्द्रियाणां वृत्तिः Ku. III ७२. ; *the a. of love* मदनस्य व्यापारः, Sa. I.—II. Deed, conduct : q. v. : (1) चेष्टितम् ; (2) विचेष्टितम्—III. Gesticulation : q. v. : चेष्टा, M. VII. ६३.—IV. Law suit, cause : q. v. कार्यम्, Mr. XI.—V. An engagement, battle : q. v. : युद्ध.—VI. In plays etc. : *कार्यम् : *there is much a. in the play* * कार्यबहुलो नाटकः

ACTIONABLE : (1) व्यवहार्यः (र्या, र्यं), (2) व्यवहर्तव्यः (व्या, व्यं) : *a. subject* व्यवहारपदं, M.

ACTIVE (adj.) : I. Agile, nimble : (1) उत्थानशीलः (ला, लं) ; (2) उत्साहिन् (f. नी) (=zealous) ; (3, 4.) क्षिप्रकारिन्, आशुकारिन् (f. णी) (=one who does quick) ; (5) तीक्ष्णकर्मन् (mfn.) (=sharp-worker) ; (6) अतन्द्रितः (ता, तं) (= not slow).—II. Busy, industrious : q. v. : (1) कर्मिष्ठः (ष्ठा, ष्ठं) ; (2) व्यवसायिन् (f. नी).—III. In gram. ; Ph. *a. verb* सकर्मकक्रिया ; *a. voice* कर्तृवाच्यम्.—IV. As opposed to passive : Ph. *a. organs* कर्मेन्द्रियाणि (n. pl.) ; *entered into a. life* संसारकार्ये व्यापृतः (ता, तं) (?).

ACTIVITY (subs.) : I. Agility : (1) क्षिप्रकारिता ; (2) उत्साहः V. ZEAL. II. Industry and energy : (1) उद्योगः ; (2) व्यवसायः ; (3) अध्यवसायः ; (4) कर्माभिनिवेशः ; (5) उत्थानशीलता. Ph. *with great a.* महता यत्नेन.

ACTOR : I. A doer : q. v. : कर्तृ (m.)—II. A stage player : (1) नटः ; (2) नर्तकः ; (3) कुशीलवः ; (4) चारणः ; (5) शैलूषः ; (6) अभिनेतृ (m.) ; (7) रङ्गाजीवः ; (8) शैलालिन् (m.) (rare).

ACTRESS : (1) नटी ; (2) नर्तकी ; (3) अभिनेत्री.

ACTUAL : (1) यथार्थः (र्था, र्थम्) ; (2) comp. with परमार्थ—.v. REAL, TRUE.

ACTUALITY : (1) यथार्थता ; (2) तत्वम् : v. REALITY.

ACTUALLY : (1) परमार्थतः ; (2) यथार्थतः v. REALLY, TRULY.

ACTUARY : लेखकः (?). v. CLERK, REGISTRAR.

ACTUATE : प्र-चुदति (चुद्, c. 6.) : v. TO MOVE, IMPEL, INFLUENCE.

ACUMEN : (1) सूक्ष्मदर्शिता ; (2) कुशाग्रबुद्धिः : v. SAGACITY

ACUTE (adj.) : I. In intellect : (1) सूक्ष्मदर्शिन् (f. नी) ; (2) कुशाग्रबुद्धि (mfn.) R. v. 4. : v. SUBTLE SHREWED, KEEN. II. Of the senses : तीक्ष्णः (क्ष्णा, क्ष्णं) : v. SHARP, PENETRATING. III. Sharp, pointed : q. v. : Ph. *a. angle*: v. ANGLE. *a. accent* उदात्तः ; *a. pain* तीव्रवेदना.

ACUTELY : v. SHARPLY, KEENLY, SUBTLY.

ACUTENESS : I. Of intellect : v. ACUMEN. II. Of the senses : (1) तैक्ष्ण्यम् ; (2) तेजः.

ADAGE : वचनम् (when the sense is clear) : v. PROVERB, SAYING.

ADAMANT : I. An imaginary stone : वज्रः (Lit. and Fig.). II. Lode-stone q. v. : अयस्कान्तः.

ADAPT : v. TO FIT, SUIT. A. ed : v. FIT, SUITABLE.

ADAPTATION : v. FITNESS, SUITABILITY.

ADD. I. To sum up : (1) योजयति, सं-, (युज्, c. 10). ; (2) सं-कलयति (कल्, c. 10)—II. To gain ,unite : q. v. : योजयति.—III. To speak in addition : अपरञ्च ब्रवीति (ब्रू, c. 2.), अभिदधाति (धा, c. 3.), etc.

ADDER : सर्पविशेषः.

ADDICT : (1) आत्मानं आ-सञ्जयति (with loc.) ; (2) आसज्जते (with loc.) : v. TO DEVOTE, GIVE UP.

ADDICTED : (1) आसक्तः, प्रसक्तः, or सक्तः (क्ता, क्तं) ; (2) निरतः (ता, तं).

ADDITION : I. The process of adding : (1) सङ्कलनम् ; (2) सङ्कलितम्, *a. of fractions* भिन्नसङ्कलितम्, Li.—II. The act of adding : (1) योगः ; (2) संयोगः ; (3) समायोगः ; (4) सङ्कलनम्—III. Anything added : योगः v. INCREASE.

ADDITIONAL : Ph. *on receiving the a. powers* * अतिरिक्तक्षमतां प्राप्य ; *there are additional reasons for his departure* * तस्य प्रस्थानस्यापराणि कारणानि सन्ति.

ADDLE (adj.) : (1) नष्टः (ष्टा, ष्टं) (?) ; (2) दुष्टः (ष्टा, ष्टा) (?) : v. PUTRID.

ADDLE-HEADED : v. SILLY, FOOLISH.

ADDRESS (subs.) : I. A speaking to : (1) सम्बोधनम् ; (2) अभिभाषणम् ; (3) वचनम्.—II. A message of respect : perh. अभिवादः.—III. Manner of speaking to another : Ph. *of pleasing a.* प्रियम्वदः (दा, दं) or मिष्टभाषिन् (f.णी) or मधुरालापिन् (f.नी)—IV. Tact, dexterity : q.v. दक्षता :—V. In pl. : of courtship : Ph. *his a.es were rejected* *तस्यामन्त्रणं प्रत्यादिष्टम्.—VI. The superscription of a letter : बाह्यनामन् (n.) *get this letter written by Sakatadasa without putting any a.* : अदत्तबाह्यनामानं लेखं शकटदासेन लेखयित्वा Mu. i.—VII. The direction : नामधामनी (n.du.).

ADDRESS (v. t.) : I. To discourse to : (1) सम्बोधयति (बुध्, c. 10.) or सम्बोधनं करोति ; (2) अभि-भाषते, सम्-, आ-, समा-, (भाष्, c. 1.), *he a.es me by my name* नामग्रहणपूर्व्वकं मां सम्भाषते. ; (3) अभि-दधाति (धा, c. 3.), *a. me as you have been accustomed to do* यथाभ्यस्तमभिधीयतां, U. i. : v. TO SPEAK TO—II. To superscribe (as a letter) : q. v. : Ph. *he a.ed a letter to me* स मह्यं पत्रं प्रालिखीत्.—III. To court, woo : q. v.

ADDUCE. (v. t.) : (1) दिशति, उत्-, निर्-, (दिश्, c. 6.), *if a man does not a. witnesses saying that he has got them* साक्षिणो मम विद्यन्ते इत्युक्त्वा यो न निर्दिशति, K. b, M. Viii. 56. ; (2) उप-न्यस्यति (अस्, c. 4.) *a.ing of witnesses* साक्ष्युपन्यासः K. b.

ADEPT (adj.) : (1) निपुण: (णा, णं) ; (2) कुशल: (ला, लं) ; (3) पटु (mfn.).

ADEQUACY : पर्याप्ति: v. SUFFICIENCY. N. B. better expr. by the adj.

ADEQUATE (adj.) : I. Sufficient : q. v. : पर्याप्त: (प्ता, प्तं).—II. As applied to men : (1) उपयुक्त: (क्ता, क्तं) ; (2) समर्थ: (र्था, र्थम्). v. COMPETENT.

ADEQUATELY : Better expr. by the adj. : v. SUFFICIENT, SUFFICIENTLY.

ADHERE (v. i.) : (1) सज्जते (सञ्ज्, c. 1.), *who a.s to my dress* को नु निवसने मे सज्जते, Sa. IV. ; (2) लगति, सं-, (लग्, c. 1.) *again a.d to the Sinsapa tree* शिंशपावृक्षे पुनर्लंलाग, etc., v. TO STICK, CLING TO.

ADHERENCE : v. ADHESION.

ADHERENT (subs.) : अनुगामिन् (f. नी) v. FOLLOWER. Ph. *Anantasira is an a. of Praharavarma* अनन्तसीर: प्रहारवर्मण: पक्ष:, D. III. : v. PARTISAN.

ADHESION (subs.) : I. Lit. : sticking to : (1) संलग्नत्वम् ; (2) संसक्ति:. —II. Fig. attachment : q. v. : आसक्ति:.

ADHESION (adj.) : Perh. श्लग्न: (ग्ना, ग्नं). v. STICKY.

ADIEU (interj.). स्वस्ति with dat.

ADIEU (subs.) : (1) आमन्त्रणम् ; (2) आपृच्छनम्. *To bid a.* : (1) आमन्त्रयते (मन्त्र् c. 10.). R. VII. 30. ; (1) आ-पृच्छते (प्रच्छ्, c. 6.). R. VIII. 49.

ADJACENT (adj) : (1) सन्निहित: (ता, तं) ; (2) सन्निकृष्ट: (ष्टा, ष्टं) ; (3) समीपवर्त्तिन् (f. नी) ; (4) ; निकटस्थ: (स्था, स्थं) ; (5) आसन्नवर्त्तिन् (f. नी).

ADJECTIVE : (1) विशेषणम् ; (2) गुणवाचक: शब्द:.

ADJOIN (v. t.) : (1) लगति, सं- (लग्. c. 1.) ; (2) स्पृशति (स्पृश्, c. 6.)

ADJOINING (adj.) : संलग्न , or, लग्न: (ग्ना, ग्नं).

ADJOURN (v. t.) : perh. व्या-क्षिपति (क्षिप, c. 6) : *a.ed the case till monday* * सोमवारं यावत् कार्यं व्याचिक्षेप : v. TO PUT OFF, POSTPONE.

ADJOURN (v. i.) : Ph. *the parliament a.ed for four days* * चतुर्दिवसं महासभा व्यक्तकार्यासीत्.

ADJOURNMENT : व्याक्षेप: (?) v. POSTPONEMENT.

Adjudge (v. t.) : v. TO AWARD ; TO DECREE ; TO SENTENCE.

Adjudicate : निर्णयति (नी c. 1.) : v. TO DECIDE, JUDGE.

Adjudication : (1) निर्णयः ; (2) निर्णयनम् : v. DECISION.

Adjunct : (1) संयुक्तः (क्ता, क्तं) ; (2) सम्मिलितः (ता, तं) ; (3) अनुबद्धः (द्धा, द्धं)

Adjuration : I. The act of adjuring : शापनम्—II. The form of oath : शपथः.

Adjure : v. TO ENTREAT, BEG.

Adjust : I. To make exact, fit : q. v. II. To regulate : q. v. : सन्निदधाति (धा, c. 3.). III. Of accounts : v. ACCOUNT.

Adjustment : v. REGULATION, SETTLEMENT.

Adjutancy : * सहचरपदं

Adjutant (subs.) : I. A military officer : * सहचरः—II. The gigantic crane : (1) चर्मिभषः ; (2) लोहपृष्ठः.

Admeasurement, Admensuration : v. MEASUREMENT, MENSURATION.

Administer (v. t.) : I. To manage, execute : q. v. : निर्-वाहयति (c. of वह्) : Ph. *to a. justice* धर्म्मविवेचनं करोति (कृ c. 8.) M. VIII. 21.—II. To give, afford : q. v. : ददाति (दा c. 3.)—III. To tender an oath : शापयति (c. of शप्).—IV. To manage an estate : *मृतकसम्पत्तेः रक्षणावेक्षणं करोति.

Administration : I. Execution, management : q. v. : निर्व्वाहः. Ph. *a. of Government* शासनम् ; *a. of justice* धर्म्मविवेचनम् ; *internal a.* प्रजासु वृत्तिः, Ki. I. I.—II. The executive part of Government : सचिवाः (m. pl.)—III. Legal. t. t. : Ph. *letters of a.* * निर्व्वाहपत्रम्.

Administrative : Ph. *his a. abilities are proverbial* * तस्य शासनकार्य्यदाक्ष्यं सुप्रसिद्धम्.

Administrator : I. A manager : q. v. : निर्व्वाहकः.—II. Of an intestate's property : * रक्षकः.

Admirable (adj.) : (1) श्लाघ्यः, (घ्या, घ्यम्) ; (2) प्रशस्तः (स्ता, स्तं) ; (3) अद्भुतः (ता, तं) (=wonderful, q. v.) ; (4) अनुपमः (मा, मं) (=incomparable q. v.)

ADMIRABLE (interj.) : साधु साधु.

ADMIRABLY : (1) साधु ; (2) सुष्ठु ; (3) in comp., by the words given under ADMIRABLE.

ADMIRAL : (1) नाविकनायकः, D. VI. ; (2) * रणपोतपतिः

ADMIRALTY : The board of a. : * रणपोतसचिवमण्डली ; सामुद्रिकसचिवसमाजः

ADMIRATION : (1) श्लाघा ; (2) प्रशंसा ; (3) प्रशंसावाद : (=acclamation, q. v.) ; (4) विस्मयः (=wonder, q. v.) Ki. XIII. 17.

ADMIRE (v. t.) : (1) प्र-शंसति (शंस्, c. 1.), *Indra a. d the speed*...बलस्य शत्रुः प्रशशंस शीघ्रताम्, Si. I. 52. ; (2) श्लाघते (श्लाघ्, c. 1.), *a.d by the assembled gods* श्लाघितो देवसङ्घैः, Ki. XVIII. 48 ; (3) स्तवीति (स्तु, c. 2.), *(some) a. deep sense* स्तुवन्ति गुर्व्वीमभिधेयसम्पदम्, Ki. XIV. 5. : V. TO PRAISE.

ADMIRER : I. Lit. : प्रशंसकः —II. A lover : q. v.

ADMIRINGLY : of gazing : (1) विस्मयविकसिताक्षः (क्षी, क्षं), D. ; (2) निश्चलनिबद्धलक्षं च, K.

ADMISSIBLE (adj.) : ग्राह्यः (ह्या, ह्यम्), M. VIII. 78.

ADMISSION (subs.) : I. Acknowledgement : q. v. : स्वीकारः.—II. Admitance, entrance : (1) प्रवेशः ; (2) प्रवेशनम्.

ADMIT (v. t.) : I. To allow to enter : (1) प्रवेशयति, *a. them at once* अविलम्बितं प्रवेशय तौ, Sa. II. ; (2) आ-वेशयति (c. of विश्), *a.ing (me) to his hut* स्वकुटिरमावेश्य, D. III.—II. To acknowledge : q. v. : (1) अभ्युपैति (इ, c. 2.) ; (2) अभ्युपगच्छति (गम्, c. 1.).—III. To be capable of : Ph. *it a.s of no other construction* * अतोऽन्योऽन्वयो न लगति or नोपपद्यते ; *it a.s of no delay* विलम्बं न सहते (?).

ADMITTANCE : V. ADMISSION.

ADMITTING THAT : V. GRANTING.

ADMIXTURE : मिश्रणम् V. MIXTURE.

ADMONISH (v. t.) :—(1) अनु-बोधयति (c. of बुध्) : V. TO REMIND ; (2)

उपदिशति (दिश्, c. 6.) : v. TO ADVISE ; (3) उपा-लभते (लभ्, c. 1.) : v. TO REPROVE.

ADMONISHER : (1) उपदेशक : v. ADVISER ; (2) प्रबोधक: (?) : v. MONITOR.

ADMONITION : (1) उपदेश: v. ADVICE ; (2) उपालम्भ: v. REPROOF ; (3) प्रत्यादेश: (?) v. WARNING.

ADMONITORY (adj.) : उपदेशगर्भ: (र्भा, र्भम्).

ADO (subs.) : v. TROUBLE, DIFFICULTY, BUSTLE.

ADOLESCENCE (subs.) : (1) यौवनम् ; (2) तारुण्यम् : v. YOUTH.

ADOLESCENT (adj.) : युवन् (f. युवती or यूनी) : v. YOUNG.

ADOPT (v.t.) : (1) गृह्णाति, परि-,प्रति-,(ग्रह्, c.9.) (Lit. and Fig.) *he who a.s a. son......* यं पुत्रं परिगृह्णीयात्, M. IX 171. ; (2) करोति (=to make, *applicable only to a.ing children), who should a. and what sort of children.* केन क: क्रियतां सुत:, D. m. : Ph. *to a. as a son* पुत्रीकरोति (nomi). D. m.

ADOPTER : ग्रहीतृ, परिग्रहीतृ, प्रतिग्रहीतृ (f. त्री) (Lit. and Fig.), D. m.

ADOPTION : (1) परिग्रह:, प्रतिग्रह: (Lit. and Fig.), D. m. ; (2) पुत्रीकरणं (=a. as a child), D. m.

ADOPTIVE : I. One who adopts : परिग्रहीतृ (f. त्री) : v. ADOPTER. II. One who is a. ed : (1) कृत्रिम: (मा, मं) ; (2) दत्तक: (a son given) ; (3) क्रीत: (a son bought). See. M. IX. 168. 169. 174. 177. : Ph. *a. daughter* अपत्यकृतिका, U. I.

ADORABLE : (1) आराधनीय: (या, यं); (2) उपास्य: (स्या, स्यं) ; (3) पूज्य: (ज्या,ज्यं).

ADORATION : (1) आराधना ; (2) उपासना ; (3) पूजा.

ADORE (v. t.) (1) उप-आस्ते (आस्, c. 2.) ; (2) उपतिष्ठते (स्था, c. 1.) ; (3) आराधयति (राध्, c. 10.) ; (4) पूजयति (पूज्, c. 10.).

ADORER : (1) आराधक: (का, कं) ; (2) उपासक: (का, कं) ; (3) पूजक: (का, कं).

ADORN (v. t.) : (1) अलं-करोति (कृ, c. 8.) ; (2) भूषयति, वि-, (भूष्, c. 10.) ; (3) मण्डयति (मण्ड्, c. 10.) ; (4) प्र-साधयति (c. of सिध्).

ADORNER :-(1) अलङ्कर्तृ (f. त्री) ; (2) प्रसाधक (f.-धिका).

ADORNMENT : I. Adorning : (1) भूषा ; (2) मण्डनम् ; (3) अलङ्क्रिया.—II. Ornament : q. v. : (1) अलङ्कारः ; (2) भूषणम्.

ADRIFT : इतस्ततः प्लवमानः (ना, नं). *To set a.* : Perh. प्लावयति (c. of प्लु).

ADROIT (adj.) : (1) निपुणः (णा, णं) ; (2) हस्तवत् (f. ती) : V. CLEVER, SKILFUL, DEXTEROUS.

ADROITLY : (1) नैपुण्येन ; (2) सपाटवम् ; (3) हस्तवत्तया.

ADROITNESS : (1) दाक्ष्यम् ; (2) नैपुण्यम् ; (3) हस्तवत्ता ; (4) चातुरी.

ADULATION : (1) चाटूक्तिः ; (2) स्तवः (?) ; (3) *by false a.s* वितथैः स्तवैः, Si.

ADULATOR : चाटुकारः V. FLATTERER.

ADULATORY : (1) चाटुपूर्णः (र्णा, र्णं) (?) ; (2) प्रशंसागर्भः (र्भा, र्भं) ; (3) श्लाघासूचकः (का, कं).

ADULT : (1) प्राप्तव्यवहारः (रा, रं) ; (2) युवन् (f. ती) : V. YOUTHFUL.

ADULTERATE (v. t.) : अपद्रव्येण मिश्रयति (मिश्र्, c. 10.) or sim. मिश्रयति (when the sense is clear). Ph. *a.d with water* जलसंसृष्टः (ष्टा, ष्टं), M.

ADULTERATER : (1) मिश्रकः, M. XI. 50. ; (2) अपद्रव्येण मिश्रणकर्तृ (m), K. b.

ADULTERATION : अपद्रव्यमिश्रणं, or sim. मिश्रणं (when the sense is clear).

ADULTERER : (1) पारदारिकः ; (2) पारतल्पिकः ; (3) परस्त्रीगामिन् (m.)

ADULTERESS : (1) व्यभिचारिणी ; (2) परपुरुषसङ्गता.

ADULTEROUS : (1) व्यभिचारिन् (f. णी) ; (2) comp. with व्यभिचार.

ADULTERY : (1) व्यभिचारः ; (2) पारदार्यम् ; (3) परस्त्रीगमनम् ; (4) परकलत्रलङ्घनम् ; (5) पतिलङ्घनम् ; (6) परपुरुषसङ्गमनम्. N. B. note that 2, 3, and 4 applicable to men only, and 5 and 6 to women only. ph. : *to commit a. with a man* परपुरुषं संगच्छति (गम्, c. 1.), *with a woman* परस्त्रीं भजते-ति (भज्, c. 1.).

ADUMBRATE (v. t.) : प्रतिच्छायां करोति (कृ, c. 8.) (?).

ADUMBRATION : i. e. the sketch : प्रतिच्छाया (?).

ADUST : (1) दग्ध: (ग्धा, ग्धं) ; (2) शुष्क: (ष्का, ष्कं) : v. PARCHED.

ADVANCE (v. i.) : I. To move forward : (1) प्रयाति, *the chariot a. d towards Krishna* अभिशौरि रथ: प्रययौ, Si. xx. 2. ; (2) उच्चलति (चल्, c. 1.), *I a.d three or four steps* त्रिचतुराणि पदान्युदचलम्, D. II. ; (3) अभि-याति (या, c. 2.), अभ्या-गच्छति (गम्, c. 1.), etc. (with acc.), *at once a.d against the lords of the quarters* सपदि ककुभामीशानभ्यागमत्, Ku. XVI. 50. ; (4) अभिमुखं याति, व्रजति, etc., *should a. against the enemy* विपक्षाभिमुखं व्रजेत्, Ka. XVIII. 2. Ph. *the day has a.d* दूरमधिरूढ: सविता, Sa. IV. II. To make progress : q. v. : ph. *with his age, he a.d in knowledge* वयसा सह ज्ञानमस्य ववृधे. Ph. : *of a.d age* : (1) गतवयस्, H. ; (2) गलितवयस्, R. ; (3) परिणतवयस्, K.

ADVANCE (v.t.). : I. To bring forward : अभिमुखं चालयति (c. of चल्) or नयति (नी, c. 1.)—II. To promote, forward : q. v. : वर्द्धयति (c. of वृध्).—III. To offer or propose (as an opinion) : q. v.—IV. To pay beforehand : Ph. *a.d* 500 *rupees for the bridge* * सेतुबन्धनार्थं पञ्चशतरूप्यमुद्रा: प्रागेव दत्तवान्.

ADVANCE (subs.) : I. Onward movement : (1) प्रयाणम् v. GOING ; (2) आगमनम्. v. COMING.—II. Progress, improvement : q.v. : उन्नति:—III. Increase of price : वृद्धि:—IV. A paying beforehand : अग्रिमदानम् (?).

ADVANCED-GUARD : नासीरचरा: (m. pl.) (after Vi.) and sim. comp.

ADANCEMENT : (1) उन्नति: ; (2) अभ्युदय: : v. PROMOTION.

ADVANTAGE (subs.) I. Benefit : (1) हितं (=good, q. v.), *for whose a.* कस्य हिताय ; (2) लाभ: (=profit, q. v.), *what a. will you derive* * तव को लाभो भविष्यति ; (3) गुण: (=merit, q. v.). *they do not know the a.s of riding* * अश्वारोहणगुणान् जानन्ति.—II. Opportunity q. v. : अवसर:.—III. Superiority : Ph. *the enemy had the a. of us in number* शत्रूणां संख्यायामधिकासीत्.

ADVANTAGE (v. t.) : उपकरोति (कृ, c. 8.) : v. TO PROFIT.

Advantageous : (1) हितकरः (री, रं) : v. BENEFICIAL ; (2) लाभावहः (हा, हं) v. PROFITABLE ; (3) अर्थकरः (री, रं) (=enriching). *To be a.* : v. TO ADVANTAGE.

Advantageously : I. Profitably : q. v. II. Conveniently : q. v.

Advent : आगमनम् : v. ARRIVAL.

Adventitious : (1) आहार्यः (र्या, र्यम्) ; (2) आगन्तुकः (की, कं) (?) ; (3) बाह्यः (ह्या, ह्यं) (=external : q. v.).

Adventure : I. Risk, hazard : q. v.—II. A remarkable achievement : (1) अद्भुतं कर्म, *although a boy, Rama is celebrated for his a. s* रामः कर्मभिरद्भुतैः शिशुरपि ख्यातः, Vi. III. ; (2) चरितम् (=the sum total of one's a. s.) *the a. s of the ten princes* दशकुमारचरितम्—III. Accident : q. v.

Adventure (v.) : v. TO VENTURE, DARE.

Adventurer : साहसिकः (की, कं). *A military a.* : v. FREEBOOTER.

Adventurous : साहसिकः (की, कं) : v. BOLD, RASH.

Adverb : क्रियाविशेषणम्. A. ial : * क्रियाविशेषकः (का, कं).

Adversary : (1) वैरिन् (m.) ; (2) विपक्षः v. OPPONENT, ENEMY.

Adversative : * विरोधसूचकमव्ययम् यथा 'तु' 'तथाच'.

Adverse : (1) प्रतिकूलः (ला, लं) ; (2) विपक्षः (क्षा, क्षं) : v. INIMICAL HOSTILE.

Adversity : (1) विपद् (f.) ; (2) आपद् (f.) v. CALAMITY, MISFORTUNE.

Advert to : (1) उदाहरति (हृ, c. 1.) : *if in course of conversation, people were to a. to your name* कथाप्रसङ्गेन जनैरुदाहृतात् तवाभिधानात्, Ki. I. 24. (2) उत्-क्षिपति (क्षिप, c. 6.) v. TO NOTICE, ALLUDE.

Advertence : अवधानम् : v. ATTENTION, NOTICE.

Advertise (v. t.) : I. To inform : q. v. : ज्ञपयति (c. of ज्ञा)—II. To publish a notice of : (1) * वि-ज्ञापयति (c. of ज्ञा) ; (2) * घोषयति (घुष्, c. 10) : Ph. *a. d a horse for sale in the Soma Prakasa* * विक्रेयो घोटक इति सोमप्रकाशपत्रिकायां विज्ञापयामास. [* विज्ञापनम् ; (2) * घोषणा.

Advertisement : I. Information : q. v. II. A public notice : (1)

ADVERTISER : * घोषकः.

ADVICE : I. Counsel : (1) उपदेशः ; (2) शासनम् ; (3) अनुशासनम्. *To give a.* may be expr. by शास्ति etc. : *what sort of friend is he who does not give good a. to his master* स किंसखा साधु न शास्ति योऽधिपम्, Ki. I. 5. v. TO ADVISE. II. Intelligence : q. v. संवादः.

ADVISABLE : युक्तः (क्ता, क्तं) B. XII. 15 : v. PRUDENT, EXPEDIENT.

ADVISABILITY : औचित्यम् : v. EXPEDIENCY.

ADVISE (v. t.) I. To give advise : (1) उप-दिशति (दिश्, c. 6.). *there is nothing to a. you* ते नाल्पमप्युपदेष्टव्यमस्ति, K. ; (2) शास्ति, अनु (शास्, c. 2.), *a. me what is to be done with this wealth* किं विधेयमनयार्थसम्पदा, शाधि...मां Si. XIV, 11. N. B. These verbs may take two acc.s. II. To inform : q. v. : ज्ञापयति (c. of ज्ञा).

ADVISEDLY : v. DESIGNEDLY, PURPOSELY. Ph. *a. cruel* मतिपूर्वनिष्ठुरः, R. VIII...65.

ADVISER : (1) उपदेष्टृ (m.) ; (2) उपदेशकः ; (3) शासकः (rare in this sense).

ADVOCACY : no equiv. : * अभिभाषणम्: v. DEFENCE, VINDICATION, RECOMMENDATION. [VINDICATE.

ADVOCATE (v) : * अभिभाषते (भाष्, c. 1.) : v. TO PLEAD DEFEND,

ADVOCATE (subs.) : I. A pleader : * अभिभाषकः ; उकिल: ;—II. A defender, vindicator : q. v. : * अभिभाषकः.

ADVOWEE : * धर्म्मवृत्तिदः (दा, दं).

ADVOWSON : * धर्म्मवृत्तिदानम्.

ADZE : (1) वासि (m.) or वासी (f.) ; (2) तक्षणी.

AERIAL : I. Lit. : (1) वायवः (वी, वं) ; (2) वायुसम्भवः (वा, वं) (=produced in the air) ; (3) वैहायसः (=through the air). Ph. *a. flight* : (1) नभोगतिः , (2) वियदुत्पतनं ; *a. spirit* नभश्चरः (री,रं).—II. Fig. : lofty : व्योमस्पृश् (mfn.) and sim. comp.

Aerie : (1) कुलाय: ; (2) नीड : : v. nest.

Aerolite : perh. गगनशैल: ; * वायूपल:.

Aeromancy : * वायुगत्या भविष्यशुभाशुभकथनम्.

Aerometer : * भारमाप: ; वायादीनां भारमापकयन्त्रविशेष:.

Aeronaut : विमानयाट (f. षी) ; नभश्चर: (री, रं).

Aesthetics : * रुचिविज्ञानम्.

Afar : दूरात् (from a.) *A. off* दूरस्थ: (स्था, स्थं).

Affability : (1) मधुरालापता ; (2) मिष्टभाषिता ; (3) सौजन्यम ; (4) प्रश्रय:.

Affable : (1) मधुरालाप: (पा, पं) ; (2) मिष्टभाषिन् (f. णी) : v. courteous.

Affably : (1) सौजन्येन ; (2) प्रश्रयेण : v. courteously.

Affair : कार्यम्, *state a.s* राजकार्याणि : v. business.

Affect (v. t.) : I. To act upon, influence : Ph. *I am a.ed with pain in the feet* मम पादयो: पीडा सञ्जाता ; *as if a.ed with devil* पिशाचोपहतमिव. —II. Of feelings. Ph. *a. ed with sorrow* शोकाभिभूत: (ता, तं) ; *a.ed with joy* हर्षाकुल: (ला, लं) ; *a.ed with those lamentations* आहतस्तै: परिदेवितास्वरै: ; *his speech did not a. the audience* * तस्योक्ति: श्रोतृवर्गहृदयानि न जगाह or श्रोतृवर्गहृदयेष्ववकाशं न लेभे.—III. To aspire to, aim at : q. v.—IV. To love : q. v.—V. To concern : q. v.—VI. To make a mere show of. Ph. *a.ing quarrel* कृतककलहं कृत्वा, Mu. iii. ; *a.ing anger* सकृतककोपं, Sa. i : v. to feign.

Affected : I. Assumed : (1) कृतक: (का, कं), *restraining his a. anger* कृतकं कोपं संहृत्य, Mu. iii. ; (2) कृत्रिम: (मा, मं), *un-a. love* अकृत्रिमं प्रेम, Ki. iii. 37. : v. false, feigned. II. Moved (1) तरल: (ला, लं), *I am a. by your manners* तावकैरनुभावै स्तरला: स्म:, N. v. 24 ; (2) गलित: (ता,तं) (=melted) : v. to affect (ii). III. Unnatural and offensive : perh. कृतक: (का, कं) : v. unnatural. [q. v.

Affectedly : (1) by the adj. : v. affected ; (2) साटोपं (=boastfully)

Affecting (adj.) : करुण: (णा, णं) (=pathetic, q. v.) : v. to affect (ii).

AFFECTINGLY : करुणम् *spoke a.* करुणमभिहितं, K. x. 58. : v. PATHETICALLY.

AFFECTION : I. Love : (1) स्नेहः ; (2) अनुरागः ; (3) प्रणयः (conjugal or friendly a.) ; (4) प्रेमन् (n.) v. LOVE ; (5) वात्सल्यम् (parental a.) ; (6) हार्दम् (rare). N. B. note that these words agree with the loc. : *I said I feel a. for this child as for my own* औरस इवास्मिन् वत्से वत्सलतेति मया विज्ञापितः, D. III—II. An attribute or property : Ph. *a.s of the mind* मनोवृत्तयः ; *a.s of bodies* शारीरधर्माः.—III. Disease : q. v. : Ph. *remover of all rheumatic a.s* सर्व्ववातविकारनुत्, Sr.

AFFECTIONATE : (1) स्निग्धः (ग्धा, ग्धं) ; (2) प्रणयिन् (f. नी), *a. heart* प्रणयिहृदयम् Me. I. 10. ; (3) वत्सलः (ला, लं) (applied to parents) ; (4) भक्तिमत् (f. ती) (of dutiful affection towards parents and elder relatives) ; (5) प्रेमपरः (रा, रं).

AFFECTIONATELY : (1) स्निग्धम् ; (2) सानुरागम् ; (3) प्रीत्या.

AFFECTIONATENESS : स्निग्धता : v. AFFECTION (1).

AFFIANCE (subs.) : I. Marriage contract : (1) विवाहसम्बन्धः ; (2) वाग्दानं (only of the female by her guardian.) II. Trust, confidence : q. v विश्वासः.

AFFIANCE (v. t.) : I. To betroth : q. v. प्रति-शृणोति (श्रु, c. 5.), a. d to me मह्यं प्रतिश्रुता—II. To trust, confide : q. v. : विश्वसिति (श्वस्, c. 2.)

AFFIDAVIT * शपथपूर्व्वा विज्ञप्तिः Ph. *he made an a. that he is a bachelor* * अकृतोद्वाहो स्मीति शपथपूर्व्वकं विज्ञापयामास.

AFFILIATE : I. To adopt : q. v. II. To ally : q. v. III. To receive into a society : Ph. *a. d to the Calcutta University* *कलिकाताविश्वविद्यालयसंश्लिष्टः (ष्टा, ष्टं).

AFFILIATION : I. Adoption : q. v. II. Filiation : q. v.

AFFINITY : सम्बन्धः (general and matrimonial) : v. RELATION, CONNECTION.

AFFIRM : I. To assert positively : वदति (वद्, c. 1.) : v. TO ASSERT. II. To confirm, establish : q. v. : दृढयति (nomi.).

AFFIRMANT : वादिन् (f. नी) : v. ASSERTER.

AFFIRMATION : I. Assertion : q.v. : उक्तिः—II. Confirmation, establishment : q. v. : ph. : *on solemn a.* प्रतिज्ञापूर्वकं (?).

AFFIRMATIVE (adj.) I. Declaratory of what exists : अस्तित्वसूचकः (का, कं).—II. Expressing assent : स्वीकारसूचकः (का, कं.)—III. Confirmative : v. TO CONFIRM, ETC.

AFFIRMATIVE (subs.) : ph. *'yes' is an a.* अथकिं स्वीकारे ; *one maintains the a., the other the negative* एकोऽस्तित्वमपरो नास्तित्वं ब्रवीति.

AFFIX : प्रत्ययः : *a. to verbs* कृत्. ; *a. to nouns* तद्धितः.

AFFLICT : (1) पीडयति (पीड्, c. 10.) ; (2) क्लिश्नाति (क्लिश्, c. 9.) ; (3) अर्दति (अर्द्, c. 1.)

AFFLICTING, AFFLICTIVE : (1) पीडाकरः (री, रं) ; (2) बाधकः (का, कं).

AFFLICTION : I. Misfortune, calamity : q. v. II. Distress, grief : q. v.

AFFLUENCE : समृद्धिः : v. OPULENCE, RICHES.

AFFLUENT : समृद्धः (द्धा, द्धं) : v. OPULENT. RICH.

AFFLUX : प्रवाहः (?) : v. FLOW.

AFFORD : I. To give, yield, supply : q. v. : ददाति (दा, c. 3.).—II. To be able to sell or expend without imprudence : ph. *he can a. to keep four servants* * स चतुरो भृत्यान् रक्षितुं शक्नोति ; *he can a. to spend* 500 *Rs a day* *स प्रत्यहमक्लेशेन पञ्चशतरूप्यमुद्रा व्ययितुं समर्थः.

AFFRAY :-(1) द्वन्द्वम् ; (2) कलहः ; (3) डिम्बः ; (4) डमरः (rare).

AFFRIGHT (v.) : (1) भीषयते (c. of भी) ; (2) त्रासयति (c. of त्रस्) : v. TO FRIGHTEN.

AFFRIGHT (subs.) : (1) त्रासः ; (2) साध्वसम् : v. FEAR, TERROR.

AFFRONT (v. t.) : अवमन्यते (मन्, c. 4.) : v. TO INSULT.

AFFRONT (subs.) : (1) अपमानम् ; (2) अवमानना : v. INSULT.

AFFUSE (v. t.) : सिञ्चति, नि-, (सिच्, c. 6.) : v. TO POUR.

AFFUSION. (1) सेकः ; (2) निषेकः ; (3) अभिषेक.

Afloat : प्लवमानः (ना, नं), or by the verb; *I was a. for the day and the whole night* तावद्दिनोपि यावदपारसंप्लवमानः शर्वरी च सर्व्वां, D. vi. Fig. : *the rumour is a.* बहुलीभूतोयमर्थः, Sa. vi. v. TO GET ABROAD.

Afoot (adv.) : I. Lit. : पद्भ्याम् : *did she go a. or in a carriage* किमसौ पद्भ्यां गता ? उत प्रवहणेन ?, Mr. ix. II. Fig., in action : प्रारब्धः (ब्धा, ब्धं), *good men do not abandon what is set a.* प्रारब्धमुत्तमगुणा न परित्यजन्ति, P. v. TO BEGIN, UNDERTAKE.

Aforegoing : v. FOREGOING.

Aforementioned, Aforenamed, Aforesaid :-(1) पूर्व्वोक्तः (क्ता, क्तं) ; (2) प्रागुक्तः (क्ता, क्तं).

Aforetime : (1) पुरा ; (2) पूर्व्वकाले v. FORMERLY.

Afraid : (1) भीतः (ता, तं) ; (2) शङ्कितः (ता, तं) : v. FEARFUL.

Afraid, be : (1) बिभेति (भी, c. 3.) (with abl.) : *I am a. to allow girls to live publicly* बिभेमि कन्यकानां प्रकाश्यावस्थापनात्, D. iv. v. TO FEAR ; (2) शङ्कते (with acc.) : v. TO APPREHEND.

Afresh : (1) पुनर् ; (2) पुनरपि : v. AGAIN.

Aft : I. Subs. : * (नावः) पश्चाद्भागः—II. Adv. : v. ABAFT.

After (prep.) :-I. Behind : q. v. : अनु (with acc.) : *to go a.* अनु-गच्छति ; *to run a.* अनुद्रवति.—II. At a later time : (1) by abl. : *seen a. a long time* चिरोदृष्ट कालात्, U. ii. N. B. This const. is very rare. (2) अनन्तरं (with abl. or crude base) : *a. his father* पितुरनन्तरं, R. ix. 1. ; *a. 16 years* षोडशवर्षानन्तरं, D. ; *just a. his order* वचनानन्तरमेव, K. ; (3) परं (with abl.) : *a. childhood* बाल्यात् परं, Ku. i. 31. ; (4) ऊर्द्ध्वम् (with abl.) *a. childbirth* ऊर्द्ध्वम् प्रसूतेः, R. xiv. 66. ; (5) अर्व्वाक् (with abl.) (rare); (6) when time is specified, by loc. or loc. absolute of words signifying motion : *a. the rainy season* अतीते वर्षके काले, B. vii. 18. ; *a. a few days* कतिपयदिवसापगमे, K., ततो गतेषु कतिपयदिनेषु, D. [N. B. note that इतः (=from this time) and ततः (=from that

time) are sometimes prefixed in such cases for the sake of precision.] ; (7) sometimes by part.s : *a. bathing with the water of the cascade* निर्झरजलनिवर्त्तितस्नानविधिः, K.—III. In an inferior degree to : अनु (with acc.) : *a. the acquisition of friends* मित्रलाभमनु, Ki. XIII. 53. —IV. In imitation of : (1) अनु (with acc.), *every thing yours is a. me, but you do not feel the pain of separation from your beloved (wife)* सर्व्वं मामनु ते प्रियाविरहजां त्वन्तु व्यथां मानुभूः,—V. IV. ; (2) अनुरूपः (पा, पं).

After (adj.) : I. Subsequent, succeeding, later : q. v. II. More aft : Ph. *the a. sails* * पश्चाद्भागस्थानि वायुवसनानि.

After (adv.) : of time : पश्चात् : *soon a.* किञ्चित्पश्चात्, Me. I. 10. ; *long a.* चिरात्, Ra. IV. ; *how long a.* कियच्चिरेण, Sa. VI. For phrases like *many years a.* (=a. many years) : V. AFTER. (prep.) (II).

After-ages : आयतिः (?) V. POSTERITY.

After-noon (subs.) : (1) पराह्नः ; (2) अपराह्नः ; (3) वैकालः.

After-noon (adj.) : (1) अपराह्णतनः (नी, नं) ; (2) आपराह्णिकः (की, कं) ; (3) वैकालिकः (की, कं).

After-pains : प्रसववेदना.

After-piece : * उपरूपकम् ; * अनुनाटकम.

After-thought : (1) अनुबोधः ; (2) उत्तरचिन्ता (?).

Afterwards : (1) पश्चात् ; (2) परेण (rare) : V. AFTER. (adv.), THEN, THEREUPON.

Again (adv.) : I. Once more : (1) पुनर् ; (2) भूयस् ; (3) पुनरपि. *a. and a.* : (1) पुनः पुनः ; (2) भूयोभूयः ; (3) वारं वारं ; (4) असकृत्.—II. Moreover :, q. v. : अन्यच्च. Ph. :—*sleeping never to wake a.* अप्रतिबोधशायिन् (f. नी), R. VIII. 58.

Against : I. Abreast of, facing : (1) प्रति-, *a. the hostile army* प्रत्यरिसैन्यं, R. VII. 55. ; *a. the wind* प्रत्यनिलं, Ku. III. 31. ; (2) comp.

with अभि (rare), *a. the enemy* अभ्यमित्रं, Ki. xvi. 5. ; (3) अभिमुखं (in comp. or with gen.) *should advance a. the enemy* विपतेभिमुखं अभीत्, Ka. xviii. 2.—II. In opposition to : ph: (*subjects*) *should not act a. their king* राजन्यविरुद्धाभिर्वृत्तिभि वर्तितव्यम्, Mu. i. ; *I have never acted a. your wishes* प्रतिकूलं न च ते मया कृतम्, Ku. iv. 7. ; *if she, a. her caste,...*यद्ययमतिक्रम्य स्वकुलधर्मम्, D. ii.—III. In provision for : ph. *a. misfortune* आपदर्थे, H.—IV. Upon : q. v. ; v. also the verbs to which it is joined.

Agape : जृम्भमाणः (णा, णं) : v. gaping.

Agaric : v. mushroom, touchwood.

Agate : प्रवलमणिविशेषः ; perh. गोमेदः.

Age : I. Time of life : (1) वयस्, *and what is his a.* कियद्वा वयः, K. ; *of the same a.* सवयस् (mfn.), R. v. 65. ; *of advanced a.* गलितवयस् (mfn.) (poet.) R. iii. 70. ; *your majesty is still of a.* वयःस्थ एव प्रभुः, Sa. vi. ; (2) आयुस् (=the whole term of one's life) : *when the king passed the 61.st year of his a.* एकषष्टिमतिक्रम्य वर्षान् भूपतिरायुषः, Raj. —II. An epoch : q. v. : युगम् : *the golden a.* (1) कृतयुगम् ; (2) सत्ययुगम.

Age, of : (1) comp. with वर्ष, वत्सर, etc. : *thirteen years of a.* त्रयोदशवर्षः (र्षा, र्षं) D. viii. ; *one who has completed twenty years* पूर्णविंशतिवर्षः (र्षा, र्षम्), M. ii. 212. ; (2) comp. with वर्षीयः (या, यं) etc. : *twenty years of a.* विंशतिवर्षीयः (या, यं), H. iv. ; (3) comp. with वयस्कः (स्का, स्कं) v. aged (ii) : Ph. *about* 18 *years of a.* अष्टादशवर्षदेशीयः (या, यं), D. vi. ; *below two years* ऊनद्विवार्षिकः (की, कं) M. v. 68. ; *above* 90 *years of a.* नवत्यधिकवयस् (mfn.), K. b. ; *who has not reached* 25*th year of his a.* अप्राप्तपञ्चविंशतिम्, Sr.

Aged : I Old : q. v. : (1) वृद्धः (द्धा, द्धं) (as animals) ; (2) पुराणः (णा, णं) (as trees etc.) II. Of a certain age : वयस्कः (स्का, स्कं), *a. ten years* दशवर्षवयस्कः (स्का, स्कं) : v. age, of.

AGENCY : I. Action : q. v. II. Instrumentality : कर्तृत्वं, *the a. of God is visible everywhere* *सर्वेश्वरस्य कर्तृत्वं दृश्यताम्. Ph. *through my a.* मत्कर्तृक: (का, कं) ; *the burning power of iron is through the a. of applied fire* अयसो दग्धृत्वं स्वसंयुक्ताग्निद्वारकम्, S. p. b. III. The business of an agent : शाखा (=branch) : v. AGENT.

AGENT : I. One who acts for another : (1) प्रतिनिधि: ; (2) प्रतिहस्त:—II. An actor : q. v. : कर्त्ता.—III. An active power : शक्ति: (with. gen), *fire is a powerful a.* * अग्नेरूर्जस्वला शक्ति:.

AGGLOMERATE : पिण्डीकरोति (कृ, c. 8.) : v. TO COLLECT.

AGGLUTINATE : v. TO GLUE, STICK TO.

AGGRANDIZE : (1) वर्धयति, वि-, सं-, (c. of वृध्) ; (2) तनोति (तन्, c. 8.) ; (3) स्फावयति (c. of स्फाय्) ; (4) आप्याययति (c. of प्यै) ; (5) एधयति (c. of एध्).

AGGRANDIZEMENT : (1) वृद्धि: ; (2) विवृद्धि: ; (3) वर्धनम्. v. ADVANCEMENT, EXALTATION, ENLARGEMENT.

AGGRAVATE. (v. t.) : I. To enhance : q. v. : वर्धयति, वि-, (c. of वृध्).—II. To exaggerate : q. v.—III. To provoke or irritate : q. v.

AGGRAVATION : I. Enhancement : q. v. : (1) वृद्धि: ; (2) उपचय:.—II. Exaggeration : q. v.—III. Provocation, irritation : q. v.

AGGREGATE (v. t.) : संगृह्णाति (ग्रह्, c. 9.) : v. TO BRING TOGETHER.

AGGREGATE (subs.) : (1) समष्टि: ; (2) समुदाय: ; (3) निचय: ; (4) सञ्चय:.

AGGREGATE (adj.) : Expr. by the subs. : also v. TOTAL, WHOLE.

AGGREGATION : I. An aggregate : q. v. II. The act of aggregating : (1) समाहार: ; (2) संग्रह: v. COLLECTION.

AGGRESSION : (1) आक्रमणम् v. ATTACK ; (2) प्रथमापकार: (=first act of mischief).

AGGRESSOR : (1) पूर्व्वापकारी, B. IX. 102. ; (2) य: प्रथमं हिनस्ति (हिंस्, c. 7.), आक्रामति, etc.

AGGRESSIVE : आक्रमणशील: (ला, लं) (?) : v. MISCHIEVOUS.

AGGRIEVE : (1) बाधयति (c. of बाध्) ; (2) क्लिश्नाति (क्लिश्, c. 9.) : V. TO GRIEVE, INJURE.

AGHAST : (1) भयविह्वल: (ला, लं) ; (2) साध्वसोपहत: (ता, तं) ; (3) विस्मयाकुल: [(ला, लं).

AGILE : (1) चटुल: (ला, लं) (2) चपल: (ला, लं) : V. NIMBLE.

AGILITY : V. NIMBLENESS, BRISKNESS.

AGISTMENT : I. Pasturing : चारणम्.—II. The rate paid for it : चारणशुल्कम् (?).

AGITATE : I. Lit. : (1) क्षोभयति, वि-, (c. of क्षुभ्) ; (2) धूनयति, वि-, (c. of धू) V. TO SHAKE ; (3) वि-लोडयति (c. of लुड्).—II. Fig. : (1) क्षोभयति ; आकुलीकरोति. V. TO DISTURB, EXCITE.—III. To discuss, debate : q. v.

AGITATED : i. e. excited : (1) आकुल: (ला, लं) ; (2 विप्लव : (वा, वं).

AGITATED, TO BE : (1) क्षुभ्यति (क्षुभ् c. 4.) ; (2) आकुलीभवति (भू, c. 1.) ; (3) चलति, वि-, (चल्, c. 1.).

AGITATION : I. Commotion : (1) क्षोभ: ; (2) विलोडनम् ; (3) ; विधूननम्.—II. Mental a. : (1) क्षोभ: ; (2) व्याकुलता.—III. Discussion : q. v. : विचारणम्.

AGITATOR : Ph. political a.s * राज्यविक्षोभका:.

AGNAIL : (1) नखरोग: ; (2) चिप्य:.

AGNATE : (1) सगोत्र: (त्रा, त्रं) ; (2) सनाभि (mfn.) : V. KINSMAN.

AGNUS CASTUS : पादपविशेष:.

AGO : Ph. 1927 *years a.* इत: पूर्व्वं सप्तविंशत्योत्तरोनविंशतिशततमवर्षे, Táránáth ; *six months a.* इत: षण्मासात् पूर्व्वम् ; *long a.* पुरा ; *not very long a.* नातिपूर्व्वम् (?) ; *how long a.* कियत्पूर्व्वम् (?) ; *sometime a.* किञ्चित्पूर्व्वम् (?).

AGOG : कुतूहलिन् (f. नी.) : V. EAGER, LONGING.

AGOING : (1) चल: (ला, लं) ; (2) प्रचल: (ला, लं) ; (3) प्रचलित: (ता, तं).

AGONIZE : (1) सन्तापयति (c. of तप्) ; (2) नितरां बाधयति (c. बाध्).

AGONISING (adj.) : (1) सन्तापकर: (री, रं) ; (2) बाधक: (का, कं) : V. EXCRUCIATING.

AGONY : (1) यातना (physical) ; (2) आधि: (mental) ; (3) सन्ताप: (gen. mental) ; (4) तीव्रवेदना (gen., physical) ; (5) व्यथा. v. PAIN.

AGRARIAN : (1) क्षेत्रसम्बन्ध: (न्धा, न्धं) (?) ; (2) भूमिविषयक: (का, कं) (?).

AGREE (v. t.) : v. TO ADMIT.

AGREE (v. t.) : I. To concur : तथैव or एवं मन्यते (मन्, c. 4.). In some cases, by circumlo. : *my views about jail discipline a. with yours* * कारागारशासनविषयमतान्यावयोरभिन्नानि ; *they a. as to the omnisciense of God* * ईश्वरस्य सर्व्वज्ञत्वविषये तेषामैकमत्यम्.—II. To yield assent : (1) सम्मत: (ता, तं) भवति ; (2) गृह्णाति, परि-, (ग्रह, c. 9.) (with acc.) : v. TO ACCEPT.—III. To resemble : q. v. : संवदति (वद्, c. 1.), *the characters a. with each other* संवदन्त्यक्षराणि, Mu. v.—IV. To stipulate : q. v. : अभ्युपैति, *we sent messengers to Kámamanjari, a.ing that he, who would be sought for by her, would carry the ensign of victory* काममञ्जरी यं कामयते स हरतु सुभगपताकामित्यभ्युपेत्य प्राहिणुम तस्यै दूतान्, D. II. Ph. *at the hour a.d upon* निर्द्दिष्टसमये.—V. Of food : Ph. *one should eat what a.s with him* हितमश्नीयात्, Sr.—VI. Gram. t. t. : Ph. *a verb a.s with its nominative in number and person* * वचनपुरुषविषये क्रिया कर्त्तारमनुगच्छति.

AGREEABLE : I. Pleasing : (1) मनोज्ञ: (ज्ञा, ज्ञं) ; (2) हृद्य:, (द्या, द्यं) ; (3) अभिमत: (ता, तं) ; (4) रम्य: (म्या, म्यं) ; (5) रुचिकर: (री, रं).—II. Suitable, conformable, consistent : q. v. [agreement : q. v.

AGREEABLENESS : I. Pleasantness : q. v. मनोज्ञता.—II. Consistency,

AGREEABLY : I. Pleasantly : q. v. II. Consistently, in accordance with : q. v. : *a. to his command* तस्याज्ञानुसारेण.

AGREEMENT : I. Compact : (1) संविद्, *to violate an a.* संविदं भिनत्ति (भिद्, c. 7.), अतिक्रामति (क्रम्, c. 1.), etc., M. ; (2) नियम: ; (3) समय: ; (4) प्रतिज्ञा.—II. Harmony of opinions or feelings : (1) ऐक्यम् ; (2) ऐकमत्यम् ; —III. Conformity, consistency : q. v. : (1) सादृश्यम् ; (2) अनुरूपम्.

AGRICULTURE : कृषिः, *the science of a.* कृषिविद्या.

AGRICULTURIST : (1) कर्षकः ; (2) कृषिकः ; (3) कृषिजीवी ; (4) कृषीवलः.

AGROUND : Ph. *the boat is a.* * भूमिं स्पृशति नौः.

AGUE : I. An intermittent fever : (1) विषमज्वरः ; (2) कम्पज्वरः : *a quotidian a* अन्येद्युष्कः, *a tertian a.* तृतीयकः, *a quartan a.* चतुर्थकः, Sr.—II. The ague-fit : (1) वेपथुः ; (2) कम्पः.

AH (inter.) : (1) हा (of grief etc.) v. ALAS ; (2) अहो (of surprise etc.) v. OH ; (3) आः (of contempt etc.), *ah ! frowning at me* आः मय्येव भ्रुकुटीधरः संवृत्तः, Vi.

AHA (inter.) : अहो (in all the senses of the English word).

AHEAD : v. FORWARD. *To go a.* : v. GO ON. *To get a.* : q. v.

AID (subs.) : I. Assistance, help : (1) साहाय्यम् ; (2) साहायकम्.—II. An Auxiliary, a helper : (1) सहायः ; साहाय्यकारी.

AID (v. t.) : साहाय्यं करोति (with gen.) : v. TO ASSIST, HELP.

AIDE-DE-CAMP : * सहचरः.

AIL (v. t.) : Ph. *what a.s thee* का ते पीडा ? : v. ILL, UNWELL.

AILING (adj.) : (1) पीडितः (ता, तं) ; (2) बाधितः (ता, तं) : v. ILL, UNWELL.

AILMENT : (1) पीडा ; (2) बाधा ; (3) व्यथा ; (4) आतङ्कः.

AIM (subs.) : I. The object aimed at : (1) लक्ष्यम् ; (2) शरव्यम् ; (3) लक्षं.—II. The direction of a missile weapon : सन्धानम्.—III. A purpose, intention : q. v. : चिकीर्षितम्.

AIM (v.) : I. To direct an arrow etc. : लक्षीकृत्य क्षिपति, अस्यति, etc. Ph. : *a. ing at Siva* हरबद्धलक्ष्यः, Ku.—II. To aspire, endeavour to attain : (1) आकाङ्क्षति (काङ्क्ष्, c. 1.), *a.ing at your post* पदकाङ्क्षिणा ते, Ku. ; (2) ईप्सति (desi. of आप्).

AIR (subs.) : I. The atmosphere : (1) वायुः ; (2) मरुत् ; (3) मातरिश्वन् (m.)—II. The space occupied by air : (1) वायुवर्त्मन् ; (2) व्योमन् (n.) : v. SKY.—III. Air in motion : (1) वायुः ; (2) पवनः ; (3) अनिलः ; (4)

वात: ; (5) समीरण: ; (6) मन्धवह: Ph. *for taking a.* वायु सेवनार्थम् ; *the vital a.* प्राण:—IV. Manner, mien, look : q. v. : आकृति:.—V. A tune or melody : q. v. : राग:. Ph. : *to take a.* : i. e. to get abroad : q. v. : बहुलीभवति.

AIR (v. t.) : I. To admit the fresh air : सुप्रवात: (ता, तं) करोति.—II. To dry : q. v. : आतपे ददाति (दा, c. 3.) (=to expose to the sun).

AIR-BALLOON : (1) व्योमयानम् ; (2) विमानम्.

AIR-BLADDER : * वायुकोष:.

AIRGUN : * वायुबन्दुक:.

AIRING : I. A walk or ride in the air : वायुसेवनं or वायुपरिसेवनं.—II. An exposure to air : V. TO AIR.

AIR-PUMP : * वायुनिष्कासनयन्त्रम्.

AIR-SHAFT : (in mines) : (1) वायुच्छिद्रम् ; (2) आलोकपथ: (?).

AIRY (adj.) : I. Consisting of air : (1) वायव: (वी, वं) ; (2) वायुमय: (यी, यं).—II. Relating to air : Ph. *took an a. flight* वियदुत्पपात, N. or विहायसा जगाम ; *the a. regions* वायुवर्त्मन् ; प्रवहमार्ग:.—III. Open to air : सुवात: (ता, तं).—IV. Vain, trifling : (1) शून्य: (न्या, न्यं) ; (2) असार: (रा, रं). V. Gay, lively : q. v.

AISLE : no equiv. : प्रकोष्ठ: may be used.

AKIN : I. Related by blood : (1) सजीव: (वा, वं) ; (2) सनाभि (mfn.).—II. Allied by nature : (1) सदृश: (शा, शं) ; (2) रूप (पा, पं) affixed.

ALABASTER : श्वेतप्रस्तरविशेष:.

ALACK (inter.) : अहह : V. ALAS.

ALACRITY : (1) उत्साह: V. ZEAL ; (2) औत्सुक्यम् V. EAGERNESS.

ALARM : I. Alarm-cry : no equiv. : *why don't you rouse your master by raising an a.* किमित्युच्चै: शब्दं कृत्वा स्वामिनं न जागरयसि, H.—II. Terror, fright, consternation : q. v. : (1) त्रास: ; (2) परित्रास: ; (3) उद्वेग:.

ALARM (v. t.): (1) उद्वेजयति (c. of विज्), *summon Vasantasená's mother without a.ing her* वसन्तसेनामातरमनुद्वेजयन्नाह्वय, Mr. IX. ; (2) आकुलयति (nomi.) (=to fill with anxiety) ; (3) त्रासयति (c. of त्रस्) : v. TO TERRIFY.

ALARMED (adj.) : (1) उद्विग्नः (ग्ना, ग्नं) ; (2) आकुलः (ला, लं) : v. ANXIOUS (3) त्रस्तः (स्ता, स्तं) (=terrified) ; (4) विधुरः (रा, रं) (rare).

ALARMED, BE : (1) उद्विजते (विज्, c. 6.) ; (2) त्रस्यति (त्रस्, c. 4.) v. TO DREAD.

ALARM-BELL : * विधुरघण्टा ; चौरागमनादिसूचनाय या घण्टा वाद्यते. [FUL

ALARMING (adj.) : (1) उद्वेगकरः (री, रं) ; (2) त्रासजननः (नी, नं) : v. DREAD-

ALARUM : * प्रबोधघण्टा.

ALAS : (1) अहह, *a. ! the buds of the tree of Rávana's impolicy are as if scattered around* अहह ! रक्षपतेर्दुर्विनयविटपिकोरका: परितः प्रकीर्णा इव, Vi. VI. ; (2) हाहा, *a. my Queen, my heart is bursting, my joints loosening.* हाहा देवि ! स्फुटति हृदयं स्रंसते देहबन्धः, U. III. ; (3) हा, *a. what has befallen* हा किमिदमापतितं, K. ; (4) हन्त, *a. you will be the first enemy of the man who never had an enemy* हन्त जातमजातारेः प्रथमेन त्वया रिपुणा, Si. II. 102. ; (5) बत *a. when you hear what has befallen me* ममाद्य वृत्तान्तमिमं बतोदिता, N. I. 139.

ALB : * क्रष्टधर्मपुरोहितपरिहितं शुक्लाम्बरदीनम्.

ALBATROSS : * जालपादः समुद्रपक्षिविशेषः.

ALBEIT : यद्यपि : v. ALTHOUGH.

ALBINO : श्वेतकायः (या, यं).

ALBUGO : शुक्लम् ; चक्षुरोगविशेषः.

ALBUM : *photographic a.* *आलेख्यपुस्तकम् ; *a. for inserting quotations* * वचननिवेशः.

ALBUMEN : Perh. श्वेतम् (of eggs) ; मज्जा (in the scientific sense) (?).

ALCHEMIST : (1) रसायनविद् (?) : (2) रससिद्धः (?) ; (3) रसज्ञः (?).

Alchemy, Alchymy : (1) रसायनं (?) ; (2) रससिद्धि: (?) ; (3) रसायनविद्या (?).

Alcohol : * मद्यसार: ; * सुराबीज:.

Alcove : गर्भगृहं (?) : v. recess.

Alcyon : मत्स्यरङ्क: : v. kingfisher.

Alder : वृक्षविशेष:.

Alderman : * लण्डनादिनगरस्य मेयरनाम: प्रधाननायकस्य नियम्योधिकारिभेद: ; पौरवृद्ध:.

Ale : यवसुरं : v. beer. *a. brewer* : v. brewer.

Ale house : शौण्डिकालय: Sa. v. ; * यवसुरापण:.

Ale-house-keeper : शौण्डिक: (f. की) ; * यवसुराविक्रयिन् (f. णी).

Alee : i. e. on or towrads the lee : v. lee.

Alembic : वक्र: (?) ; वकयन्त्रम्.

Alert : v. watchful, vigilant ; also nimble, brisk.

Alertness : v. briskness, watchfulness, sprightliness.

Alexandrine (subs.) : चतुर्दशाक्षरच्छन्दोविशेष:.

Algebra : बीजगणितम् A.-ist बीजगणितविशारद: (दा, दं).

Algebraic, Algebraical : (1) by tat. comp. ; (2) * बीजगणितविषयक: (का, कं).

Alias : Ph. *Ráma a. Rámánanda* * राम, यस्य रामानन्द इत्यपरनाम.

Alibi : Ph. *the prisoner proved an a.* * बन्दी स्थानान्तरस्थितिं प्रतिपादयामास.

Alien (subs.) : *विदेशिन् (f. नी) : v. foreigner.

Alien (adj.) : I. Not native : विदेशीय: (या, यं).—II. Unconnected : q. v. असम्बन्धिक: (की, कं).—III. Adverse : q. v. : विरुद्ध: (द्धा, द्धं).

Alienable : * स्वत्वान्तरीकरणीय: (या, यं) ; परैरादेय: (या, यं).

Alienate (v. t.) : I. Of property : स्वत्वान्तरं करोति or स्वत्वान्तरीकरोति (?). II. Of affections : perh. विघटयति (c. of घट्) ; विश्लेषयति (c. of श्लिष्).

Alienation : I. Of property : स्वत्वान्तरीकरणम् (?).—II. Of affections : (1) विघटनम् (?) ; (2) विश्लेषणम् (?).—III. Of mind : उन्माद:.

Alight : I. To get down : q. v. : अव-तरति (तॄ, c. 1.).—II. To settle on (as bees) : पतति, नि-, (पत्, c. 1.), *the swan a.ed on the ground* पपात भूमौ हंसः, N. III. 1.

Alike (adj.) : (1) सदृशः (शा, शं) ; (2) तुल्यः (ल्या, ल्यं) : v. LIKE, SIMILAR.

Alike (adv.) : समं : v. EQUALLY, SIMILARLY.

Aliment : आहारः v. FOOD, NOURISHMENT.

Alimentary (adj.) : v. NOURISHING. *The a. canal* *आहारवाहिनी.

Alimony : ग्रासाच्छादनम्, K. b.

Alive : I. Living : q. v. : जीवत् (f. न्ती).—II. Active, lively : q. v.

Alive, be : जीवति, *tell me, is my darling a.* कथय जीवति मे प्रिया, Ma. IX.

Alkali : (1) क्षारः ; (2) सर्ज्जिः (?).

All (adj.) : (1) सर्व्वः (र्व्वा, र्व्वम्), *all of them, enjoying a. pleasures at a. times, reached the pinnacle of happiness* सर्व्व एव सर्वकालं सव सुखान्यनुभवन्तः परां कोटिमानन्दस्याध्यगच्छन्, K. ; (2) सकलः (ला, लं) ; (3) समस्तः (स्ता, स्तं) ; (4) निखिलः (ला, लं), *knowledge of a. characters, erudition in the languages of a. countries, attainments in a. the Shastras* सकललिपिज्ञानं निखिलदेशीयभाषापाण्डित्यम् समस्तशास्त्रचातुर्यम्, D. ; (5) अखिलः (ला, लं) ; (6) कृत्स्नः (स्ना, स्नं) ; (7) समग्रः (ग्रा, ग्रं) ; (8) समुदायः aff[d], *or the abode of a. essence of beauty* सौन्दर्यसारसमुदायनिकेतनं वा, Ma. II Ph. *the Supreme Spirit is a. joy* आनन्दमयः परमात्मा, S. I. 13. v. FULL OF. ; *by a. means, one ought not to do anything without consideration* सर्व्वथाविचारितं कर्म्म न कर्त्तव्यं, H. I. ; *at a. events* अन्ततः ; *a. along* पूर्व्वावधि ; *a. around* सर्व्वतः.

ELECT (v.) : I. To choose : q. v. II. To select by vote : no equiv. : निर्वाचयति (c. of वच्) (?) ; मनोनीतं (f. तां) करोति (in Bengali).

ELECT (adj.) : निर्वाचितः (ता, तं) (?) ; स्थिरीकृतः (ता, तं) (?).

ELECTION : I. Choice : q. v. II. For an office : निर्वाचनं (?). III. The e.s. : *निर्वाचनकार्याणि (n. pl.). IV. Free will : इच्छा. V. Discernment : विवेकः.

ELECTIONEERING : I. Subs. : *निर्वाचननिर्वाहः. II. Adj. : expr. by comp., *e. agent* *निर्वाचननिर्वाहकर्मकारः.

ELECTIVE : Ph. *e. franchise* *निर्वाचनाधिकारः ; *e. office* *निर्वाचनीयपदम्.

ELECTOR : *निर्वाचकः ; निर्वाचनाधिकारिन् (m.).

ELECTORAL : expr. by comp., *the e. body* *निर्वाचकसम्प्रदायः.

ELECTRIC, ELECTRICAL : (1) वैद्युतः (ती, तं), *e. fire* वैद्युतः कृशानुः, Ki.; (2) by comp., *e. current* *तड़ित्प्रवाहः.

ELECTRICITY : (1) तड़ित् (f.), *the science of e.* *तड़िद्विज्ञानम्; (2) विद्युत् (f.), *atmospheric e.* : *वायवविद्युत्.

ELECTRIFY : I. Lit. : *to e. a jar* *घटं तड़िद्वन्तं करोति. II. Fig., to surprise : परं विस्मयं जनयति (c. of जन्).

ELECTUARY : अवलेहः, Bha. [q. v.

ELEMOSYNARY : i. e. relating to or founded or supported by charity :

ELEGANCE : (1) चारुता v. BEAUTY ; (2) माधुर्यं (of style etc.), Kav.

ELEGANT : (1) चारु (f. र्वी) v. BEAUTIFUL ; (2) मधुरः (रा, रं) (of style, manners, etc.).

ELEGANTLY : (1) चारु ; (2) मधुरम् ; (3) सललितं (of movements, etc.).

ELEGIAC : करुणार्थग्रथितः (ता, तं), and sim. comp.s. *E. metre* (in Sanskrit) : वियोगिनीवृत्तम्, M. n.

ELEGY : करुणार्थग्रथितं काव्यम् (=poem) or गीतं (=song).

ELEMENT : I. An e.ary substance : (1) भूतम्, *sky, etc. are the five e.s* : पञ्चभूतानि वियदादीनि, D. s.; *the sixth of the great e.s* भूतानां महतां षष्ठः, R.; (2) मूलपदार्थः II. Rudiments : q. v. : *e.s of grammer* : व्याकरणसारः or लघुव्याकरणम्. III. The proper sphere : Ph. *he is out of his e.* *न स्वभूमौ वर्तते सः.

ELEMENTARY : Ph. *e. substance* : मूलपदार्थः ; *e. instruction* वार्तामात्रावबोधनम्, D.; *e. treatise* लघुप्रबन्धः (?).

ELEPHANT : (1) गजः, *e.-catcher* गजबन्धः, Vet.; *a wild e.* : वनगजः ; (2) हस्तिन् (m.); (3) करिन् (m.); (4) मातङ्गः ; (5) कुञ्जरः ; (6) नागः ; (7) वारणः, *a rutting e.* : मत्तवारणः ; (8) दन्तिन् (m.) ; (9) द्विपः, *a newly caught e.* : नवग्रही द्विपः, D. II.; *a musk-e.* : गन्धद्विपः. *A she-e.* : (1) करिणी ; (2) हस्तिनी ; (3) गजवशा ; (4) करेणु (f.). *A young e.* : कर(ल)भः. *The*

leader of a (wild) herd (of e.s) : यूथनाथ: or यूथप:. *A large fine e.* : (1) गजेन्द्र: ; (2) गजपुङ्गव: ; (3) करेणुवर्य:. *The roaring of an e.* : बृंहितम्. *Its trunk* : (1) कर: ; (2) शुण्ड: ; (3) हस्त: (rare). *Its frontal globes* : कुम्भौ (m. dual). *Its temple* : (1) गण्ड: ; (2) कट:.

ELEPHANT-APPLE : (1) कपित्थ: ; (2) दधित्थ:.

ELEPHANT-DRIVER : (1) आधोरण: ; (2) हस्तिपक: ; (3) महामात्र:, Mr. ; (4) गजस्य यन्ता or नियन्ता, Ki.

ELHANTIASIS : a disease of the leg : श्लीपदं or शिलीपदम्, *one affected with e.* श्लीपदिन् (f. नी), M. III. 165.

ELEPHANTINE : expr. by comp., *e. epoch* *हस्तियुगम्.

ELEVATE : I. To raise : q. v. : उन्नमयति (c. of नम्). II. To exalt : q. v. : उन्नमयति. *E.d* : i. e. lofty : q. v. : उन्नत: (ता, तं).

ELEVATION : I. Rising : (1) उन्नमनम् ; (2) उत्तोलनम्. II. Loftiness : q. v. : उन्नतत्वम्, R. III. Of ground : उन्नतभूमि: : v. HEIGHT.

ELEVEN : एकादशन् (mfn.). *E. times* एकादशवारान्.

ELEVENTH : I. Adj. : एकादश: (शी, शं). II. Subs. : एकादशभाग:.

ELF : डाकिनी (?).

ELFIN, ELFISH : I. Lit. : expr. by comp. II. Fig. : v. MISCHIEVOUS.

ELF-LOCK : जटा, *e.s* जटाजूट: (?).

ELICIT : (1) निर्हरति (हृ, c. 1.) (= bring out) ; (2) निष्कर्षति (कृष्, c. 1.) (= draw out).

ELIDE : लुम्पति (लुप्, c. 6.).

ELIGIBILITY : I. Lit. : *निर्वाच्याधिकार:. II. Worthless : q. v. : योग्यता.

ELIGIBLE : I. Lit. : *निर्वाच्याधिकारिन् (f. णी). II. Worthy : q. v. : योग्य (f. ग्या).

ELIMINATE : निष्कासयति (c. of कस्).

ELIMINATION : निष्कासनम्.

ELISION : लोपः.

ELITE : मुख्याः (m. pl.) ; रत्नानि (n. pl.) (= gems).

ELIXIR : I. Lit. : रसायनम्. II. Fig. : सारः, *the e. of wives* : दारसारः, N.

ELK : ऋष्यः (?) ; हरिणविशेषः.

ELL : मानविशेषः.

ELLIPSE : *अण्डवृत्तं or उपवृत्तं or उपमण्डलम्.

ELLIPSIS : न्यूनपदम्, Kav.

ELLIPSOID : *अण्डवृत्तस्थूलम्.

ELLIPTIC,-AL : I. Rhet. : न्यूनपदः (दा, दं). II. Geo. : expr. by comp., *e. motion* *उपवृत्तगतिः.

ELLIPTICALLY : expr. by circum. : v. WANTING.

ELM : वन्यपादपविशेषः.

ELOCUTION : I. The power of speech : वाक्शक्तिः. II. Delivery : व्याहारः. III. Eloquence : वाग्मिता.

ELONGATE : दीर्घीकरोति : v. TO LENGTHEN.

ELONGATION : I. Extension : विततिः. II. Distance : q. v. : विप्रकर्षः.

ELOPE : पलायते (पलाय्, c. 1.) : v. TO RUN AWAY. Ph. : *she e.d with him* : तेन सह देशान्तरं जगाम (after D.).

ELOPEMENT : पलायनम् : v. FLIGHT.

ELOQUENCE : I. Of men : (1) वाग्मिता ; (2) वाक्पाटवम्. II. Of address, etc. : perh. प्रौढत्वम्, Ma.

ELOQUENT : I. Of men : (1) वाग्मिन् (f. नी), *at the head of the e.* : वाग्मिनां धुरि, Ki. ; (2) वाक्यकोविदः (दा, दं), M. n. ; and sim. comp.s. II. Of speeches, etc. : perh. प्रौढः (ढा, ढं).

ELOQUENTLY : (1) प्रौढं (?) ; (2) सपाटवं (= skilfully) ; (3) वाग्विलासेन (?).

Else (conj.) : (1) अन्यथा ; (2) इतरथा : v. otherwise.

Else (adj.) : Ph. : *who e.* कोऽन्यः or कोऽपरः, K. ; *what e.* किमन्यत् or किमपरम्, Ma. or किमितः परं, Ra. ; *some thing e.* अन्यत् किञ्चित्, Ana. ; *somewhere e.* अन्यत्र कुत्रापि, N.

Elsewhere : (1) अन्यत्र ; (2) अन्यतः, R. v. 17.

Elucidate : (1) उद्भासयति (c. of भास्) ; (2) विशदीकरोति (कृ, c. 8.) : v. to explain.

Elucidation : (1) उद्भासनम् ; (2) विशदीकरणम् : v. explanation.

Elucidator : उद्भासकः : v. interpreter.

Elude : (1) (कौशलेन) परिहरति (हृ, c. 1.) ; (2) मोघीकरोति (= to frustrate : q. v.).

Elysian : स्वर्गीयः (या, यं) (= heavenly : q. v.).

Elysium : स्वर्गः (= heaven) ; वैकुण्ठं (of Vishnu).

Emaciate : I. To make lean : (1) कर्शयति, परि-, (c. of कृश्) or कृशीकरोति, *e.d by disfigurement* : वैरूप्यकर्शितः (ता, तं), Ram. ; (2) क्षिणोति, परि-, (क्षि, c. 5.), *the disease e.d him* : आमयस्तमक्षिणोत्, R. II. To become lean : (1) कृशीभवति or कृश्यति, परि-, (कृश्, c. 4.) ; (2) क्षीयते (pass. of क्षि).

Emaciate (adj.) : परिकृशः (शा, शं) : v. lean, thin.

Emaciation : (1) कृशता ; (2) कार्श्यम् ; (3) क्षामता.

Emanate : I. To flow from : q. v. : उद्गच्छति (गम्, c. 1.). II. To arise, originate : q. v. : उद्गच्छति.

Emanation : I. The act : उद्गमः ; निर्गमः. II. That which comes out : expr. by verb.

Emancipate : मोचयति or मोक्षयति, वि-, (मुच् or मोक्ष्, c. 10.), *you will be e.d from the bond of the world* : भवबन्धाद्विमोक्ष्यसे, V. c. ; *they should be e.d by the king* : राज्ञा मोचयितव्यास्ते, M. p. : v. to liberate, free.

Emancipation : मोक्षः, *e. of slaves* : दासस्य मोक्षः, Viv. : v. liberation, release.

EMANCIPATOR : मोचयितृ (f. त्री) : v. LIBERATOR.

EMASCULATE : I. Lit., to castrate : पुंस्त्वं हन्ति, उप-, प्रति- (हन्, c. 2.), V. s. II. Fig. : v. TO WEAKEN, ENERVATE.

EMASCULATE-D (adj.) : I. Lit. : हतपुंस्त्वः. II. Fig. : हतवीर्य (f. र्या).

EMASCULATOR : (1) पुंस्त्वस्य प्रतिघातकृत्, Y. ; and sim. comp.s.

EMBALM : (1) रक्षति (रक्ष्, c. 1.), *therefore (they) e. the king* : ततो रक्षन्ति भूमिपम्, Ram. ; (2) तैले निक्षिपति (क्षिप्, c. 6.) (to e. in oil.), B.

EMBALMER : expr. by verb : v. above.

EMBANK : वप्रेण बध्नाति (बन्ध्, c. 9.).

EMBANKMENT : वप्रबन्धः (?) : v. MOUND, BANK.

EMBARGO : निषेधः or प्रस्थाननिषेधः (?).

EMBARK (v. t.) : I. Lit. : (1) नौकायाम् आरोपयति (c. of रुह्,) or निदधाति (धा, c. 3.) (=put on board), *e.ing them all* : अस्यां निधाय सर्वांस्तान्, Mat. ; (2) नौकया प्रस्थापयति (c. of स्था) (= to send by boat). II. To engage : व्यापारयति (c. of वृ).

EMBARK (v. i.) : I. Lit. : (1) नावं or पोतम् आ-रोहति, अधि-, (रुह्, c. 1.), etc., *without e.ing on a vessel* : पोताधिरोहेण विनैव, Tar. ; (2) नौकया प्रतिष्ठते (स्था, c. 1.) (=to depart). II. To engage : व्याप्रियते (वृ, c. 4.)

EMBARKATION : नौकारोहणं (going) or नौकारोपणं (putting on board) ; प्रस्थानं (=departure).

EMBARASS : (1) आकुलयति (= to perplex), *affection e.es Satananda* : स्नेहः शतानन्दमाकुलयति, An. ; (2) मोहयति, वि-, प्र-, व्या-, (c. of मुह्) (= to confound), *I am e.ed seeing (this) evil* : अनर्थमुत्प्रेक्ष्य प्रमुग्धोऽस्मि, An. ; (3) बाधते (= to hinder, annoy), Vi.

EMBARASSMENT : (1) व्याकुलता ; (2) प्रमोहः ; (3) बाधा ; (4) विषमं (= difficulty : q. v.).

EMBASSADOR : v. AMBASSADOR.

EMBASSY : I. Lit. : दौत्यं or दूत्यम्. II. The dwelling of an ambassador : दूतावासः.

EMBATTLED : (1) विन्यस्तः (स्ता, स्तं) ; (2) विरचितः (ता, तं). Ph. : *e. field* युद्धक्षेत्रम्.

EMBEDDED : (1) निहित. (ता, तं) ; (2) न्यस्त (f. स्ता) ; (3) निविष्ट (f. ष्टा).

EMBELLISH : वि-भूषयति (भूष्, c. 10.) : v. TO ADORN.

EMBELLISHMENT : विभूषणम् : v. ADORNMENT, ORNAMENT.

EMBERS : भस्मन् (n.) : v. ASHES.

EMBER-DAY : उपवासदिवसः (?).

EMBEZZLE : छद्मम् आत्मसात्करोति (कृ, c. 8.).

EMBEZZLEMENT : छद्ममात्मसात्करणम् ; चौर्यं (= theft).

EMBEZZLER : छद्ममात्मसात्कर्तृ (f. र्त्री) : v. also THIEF.

EMBITTER : I. Lit. : तिक्तायते (nomi.). II. To distress : क्लिश्नाति (क्लिश्, c. 9.). III. To exasperate : उत्कोपयति (c. of कुप्).

EMBLAZON : (1) मण्डयति (मण्ड्, c. 10.) ; (2) विभूषयति (भूष्, c. 10.).

EMBLAZONRY : पताकादिमण्डनम् (?).

EMBLEM : (1) लक्षणम् ; (2) लाञ्छनम् ; (3) लिङ्गम्.

EMBLEMATIC,-AL : expr. by *emblem* : v. SYMBOLIC.

EMBLEMATICALLY : लक्षणेन (?) : v. also FIGURATIVELY.

EMBODIMENT : I. Lit. : expr. by verb. II. Representation : Ph. *e. of virtue* सशरीरो धर्मः.

EMBODY : I. Lit. : देहेन or शरीरेण युनक्ति (युज्, c. 7.) II. To collect : q. v. : समाहरति (हृ, c. 1.).

EMBOLDEN : साहसं जनयति (जन्, c. 10.) : v. TO ENCOURAGE.

EMBOSS : उच्चरेखादिना तक्षति (तक्ष्, c. 1.) (?).

EMBOWEL : I. To eviscerate : अन्त्राणि अपनयति (नी, c. 1.) v. TO REMOVE. II. To embalm : q. v. III. To busy : q. v.

EMBOWERED : कुञ्जितः (ता, तं), नि-,.

EMBRACE (v.) : I. To clasp : (1) आ-लिङ्गति, समा-, (लिङ्ग्, c. 1.), *the father e.d him with open arms* : प्रसारितभुजयुगलस्तं पितालिलिङ्ग, K. ;

(2) आश्लिष्यति, समा-, सं-, उप-, (श्लिष्, c. 4.), *e.d the pillar for a moment* : क्षणं स्तम्भमाश्लिषत्, Si.; (3) स्वजते, परि-, (स्वञ्ज्, c. 1.), *e.ing her firmly*: तां दृढं परिष्वज्य, D.; (4) उपगूहति (गुह्, c. 1.), *as if e.ing me with cool breezes*: शिशिरानिलैर्मामुपगूहतीव, R.; (5) परिरभते (रभ्, c. 1.), *was (it) e.d with the eyes*: परिरेभे तु विलोचनाभ्यां, Ki. II. To comprise: q. v.: क्रोडीकरोति, *from (its) e.ing also another sense*: अर्थान्तरस्यापि क्रोडीकरणात्, Kuv. III. To accept: q. v.: परिगृह्णाति (ग्रह्, c. 9.).

EMBRACE (subs.) : (1) आलिङ्गनम्; (2) आश्लेषः; (3) परिरम्भः; (4) परिष्वङ्गः; (5) उपगूहनम्; (6) आलिङ्गितम्.

EMBRASURE : छिद्रं (=any aperture).

EMBROCATE : (1) मृद्नाति, सं-, (मृद्, c. 9.); (2) संवाहयति (c. of वह्).

EMBROCATION : I. The act : (1) मर्दनम्, सं-; (2) संवाहनम्. II. A lotion for e. : expr. by comp.

EMBROIDER : Ph. *e.ed cloth* कार्मिकवस्त्रम्; *he knows to e. cloth* वस्त्रोपरि कर्म्म कर्तुं जानाति.

EMBROIDERER : कार्म्मिकवस्त्रकारः, and sim. comp.s.

EMBROIDERY : I. Variegated needle-work : Ph. *this is gold e.* : *स्वर्णकर्म्मैतत्: V. TO EMBROIDER. II. Fig., decoration : अलङ्कारः.

EMBROIL : आकुलीकरोति : V. TO CONFOUND, PERPLEX.

EMBROILMENT : संक्षोभः : V. CONFUSION, PERLEXITY.

EMBRYO : I. Lit. : गर्भः or अपरिणतगर्भः. II. Fig. : *this work is in e.* अपरिणतेयं कृतिः.

EMBRYONIC, EMBROYTIC : अपरिणतः (ता, तं) (?).

EMEND : शोधयति (c. of शुध्) : V. TO CORRECT.

EMENDATION : शुद्धिः : V. CORRECTION.

EMENDATOR : शोधकः, सं-, वि-, परि-.

EMERALD (subs.) : (1) मरकतः; (2) हरिन्मणिः; (3) गारुत्मतम् (n.).

EMERALD (adj.) : (1) expr. by tat. ; (2) मारकत: (ती, तं).

EMERGE : उन्मज्जति (मज्ज्, c. 6.), *e.ing from the river of arrows* : बाणनद्या उन्मज्जन्, Ki. ; *slowly e.d from the eastern ocean* : पूर्वपयोधेः शनकैरुन्ममज्ज, Ki. : v. TO RISE.

EMERGENCE : उन्मज्जनम् : v. RISE.

EMERGENCY : I. Crisis, occasion : q. v. : सङ्कटम्. II. Exigency : q. v. : प्रयोजनम्.

EMERGENT : I. Lit. उन्मज्जत् (f. ती). II. Critical : Ph. *e. business* आत्ययिकं कार्यम्, H.

EMERSION : I. Lit. : उन्मज्जनम्. II. Astro. : मोक्षः, Su.

EMERY : अश्मसारः (?).

EMETIC : वान्तिकरः (री, रं), and sim. comp.s.

EMIGRANT : *निर्वासिन् (f. नी) ; स्वदेशत्यागिन् (f. नी).

EMIGRATE : *निर्वसति (वस्, c. 1.), *e.d to America* : आमेरिकां निष्कुः ; वासार्थं देशान्तरं गच्छति, व्रजति, etc.

EMIGRATION : *निर्वासः.

EMINENCE : I. A height : q. v. : उन्नतभूमिः. II. Exaltation : q. v. : (1) उत्कर्षः or प्रकर्षः ; (2) उन्नतिः, सम्-. III. As a title : भगवत् (f. ती).

EMINENT : (1) उत्कृष्टः (ष्टा, ष्टं) v. EXCELLENT ; (2) विश्रुतः (ता, तं) v. CELEBRATED ; (3) असाधारण (f. णी) v. UNCOMMON.

EMINENTLY : (1) अति- in comp. v. EXCEEDINGLY ; (2) विशिष्ट v. ESPECIALLY. ; (3) शोभनम् v. WELL.

EMISSARY : (1) चरः ; (2) चारः ; (3) प्रणिधिः.

EMISSION . I. Lit. : (1) मोक्षः ; (2) विसर्जनम् ; (3) निर्गमः or निष्क्रमः (= coming out) ; (4) उद्गारः (= throwing up) ; (5) स्रावः (= flow). II. Animal : रेतःस्खलनम् ; रेतःस्रुतिः ; रेतःक्षरणम् ; वीर्यनिषेकः ; etc. Ph. *he had e.* : अस्य रेतः चस्कन्द or सुस्राव, Mah.

EMIT (v.) : (1) मुचति, निर्-, वि-, प्र-, (मुच्, c. 6.), *e.ted steam* : उष्माणम-मुञ्चत्, Ku. ; *to e. water* : अपो मुञ्चति, Ki. ; (2) विसृजति (सृज्, c. 6.), *to e. fire* : अग्निं विसृजति, Sa. v. TO SEND BORTH, THROW OUT, VOMIT. *To be e.ted* : i. e. to come out : q. v. : निः-सरति, प्र-, (सृ, c. 1.), *from the bow arrows were e.ted* : धनुषः शराः प्रसस्रुः, Si.

EMMET : पिपीलिका : v. ANT.

EMOLLIENT : I. Adj. : क्लेदनः (नी, नं). II. Subs. : क्लेदनम्.

EMOLUMENT : लाभः : v. GAIN, SALARY.

EMOTION : I. Feeling : q. v. : रसः, *the tender e.* : करुणरसः, U. II. Excitement : q. v. : (1) विकारः, विकृतिः, or विक्रिया, *seeing the e.s (of Nala) of holy fame* पुण्यश्लोकस्य विकारं दृष्ट्वा, Mah. ; (2) अपकृतिः (rare), *unable to control her e.s* : अपाकृतीर्विनियन्तुमक्षमा, Ki. I. 27.

EMPALE : I. To enclose : q. v. II. To put to death : शूलं or शूले or शूलायाम् आरोपयति (c. of रुह्), P. ; शूले निवेशयति (c. of विश्), Vir.

EMPEROR : (1) सम्राज् (m.) ; (2) महाराजः ; (3) अधिराजः ; (4) राज-राजः ; (5) राजाधिराजः ; (6) राजेन्द्रः ; (7) अधीश्वरः ; (8) सार्वभौमः (rare), *e. of the gods* : देवतासार्वभौमः, Kuv.

EMPHASIS : शक्त्यात्कर्षद्योतकोक्तिः, (after Taranatha).

EMPHASIZE : शक्त्युत्कर्षद्योतनाय द्रढयति (nomi.) (?).

EMPHATIC : (1) दृढः (ढा, ढं) (= firm) ; (2) निश्चितः (ता, तं) (= certain) ; (3) सबलः (ला, लं) (= forcible).

EMPHATICALLY : (1) दृढं (= firmly) ; (2) निश्चितं (= certainly) ; (3) बलात् (= forcibly) ; (4) सगौरवं (= gravely).

EMPIRE : (1) साम्राज्यम् ; (2) आधिराज्यं (rare) : v. KINGDOM.

EMPIRIC (subs.) : I. A quack : कुवैद्यः. II. An examiner : q. v.

EMPIRICAL : I. In good sense : दर्शनसिद्धः (f. द्धा). II. In bad s. : असिद्धः (द्धा, द्धं).

EMPIRICALLY : I. In good sense : बहुदर्शनेन. II. In bad s. : अविद्यया.

EMPIRICISM : i. e. quackery : अशास्त्रचिकित्सा (?).

EMPLOY (subs.) : v. EMPLOYMENT.

EMPLOY (v. t.) : I. To use : q. v. : प्रयुङ्क्ते. II. To commission : (1) नि-युङ्क्ते or योजयति (युज्, c. 7. and 10.), *e. (me) without any hesitation in what are to be done* : कर्तव्येषु विस्रब्धतया नियुज्यतां, K. ; (2) व्यापारयति (c. of वृ), *e.d to break their confederacy* : तत्संहतिभेदाय व्यापारिताः, Mu.

EMPLOYE : (1) अधिकृतः ; (2) नियोज्यः, Sa. : v. OFFICER.

EMPLOYER : (1) नियोजकः ; (2) प्रयोजकः.

EMPLOYMENT : I. Lit. : (1) प्रयोगः ; (2) नियोगः. II. Occupation : कर्मन् (m.), *to dismiss from an e.* कर्मणोऽपकर्षति, Mah. : v. SERVICE, LIVELIHOOD, OFFICE.

EMPORIUM : वाणिज्यस्थानम्.

EMPOWER : क्षमतां ददाति (दा, c. 3.) : v. TO AUTHORIZE.

EMPRESS : (1) अधिराज्ञी ; (2) महाराज्ञी ; (3) राजराजेश्वरी ; (4) राजाधिराज्ञी.

EMPTINESS : I. Lit. : (1) शून्यता ; (2) रिक्तता. II. Fig. : असारता,

EMPTY (adj.) : I. Lit. : (1) शून्यः (न्या, न्यं), परि-, *the street is e.* : शून्यो राजमार्गः, Mr. I. ; *today my bed is e.* : परिशून्यं शयनीयमद्य मे, R. ; (2) रिक्तः (क्ता, क्तं) (rare), *in the e. mouth of the quiver* : रिक्ते निषङ्गवक्त्रे, Ki. II. Fig. : असारः (रा, रं), *in this e. world* असारे संसारे, Va. : v. VAIN.

EMPTY (v. t.) : (1) शून्यीकरोति ; (2) रिक्तीकरोति, *e.ing tanks* : रिक्तीकुर्वन् सरांसि, K. ; (3) रिणक्ति (रिच्, c. 7.) (rare), B.

EMPTY (v. i.) : शून्यीभवति, D. Ph. *the rivers quickly e. themselves in the ocean* प्रयान्ति नद्यस्त्वरितं पयोनिधिं, Ri.

EMPTY-HANDED : (1) शून्यहस्तः (स्ता, स्तं) ; (2) रिक्तहस्तः (स्ता, स्तं) ; etc.

EMPTY-HEADED : शून्यमस्तिष्कः (ष्का, ष्कं), and sim. comp.s.

EMPYREAL : तेजोमयः (यी, यं).

EMPYREAN : वैकुण्ठं (?) ; तेजोलोकः (?).

EMULATE : स्पर्धते (स्पर्ध्, c. 1.), *the accursed Rakshasha is e.ing me* : मया सह स्पर्धते राक्षसहतकः, Mu.

EMULATION : स्पर्धा, *as if in e. of the waters of the celestial river* : दिव्यसरिदम्बुपद्धतिस्पर्धयेव, Si. : v. also RIVALRY, CONTEST.

EMULATIVE, EMULATORY : V. EMULOUS.

EMULATOR : स्पर्धिन् (f. नी), प्रति- : V. RIVAL.

EMULOUS : स्पर्धिन् (f. नी). *E. of* : स्पर्धया : V. EMULATION. *To be e. of* : V. TO EMULATE.

EMULOUSLY : स्पर्धया ; स्पर्धापूर्वकम्.

ENABLE : शक्तिं, सामर्थ्यं, or क्षमतां ददाति (दा, c. 3.) ; better by circum. ; *it will e. you to decamp* : अनेन ततापसर्पणं शक्यम्.

ENACT : I. To decree : करोति, *to e. laws* : *विधीन् करोति. II. To do, perform : q. v. : करोति.

ENACTMENT : I. The act : करणम् ; निष्पादनम्. II. A law : कृतिः (?) ; विधिः.

ENACTOR : कर्तृ (f. र्त्री) : V. DOER.

ENAMEL (subs.) : *अनामिलम्.

ENAMEL (v.) : *अनामिलयति (nomi.) ; अनामिलेन रञ्जयति (रञ्ज्, c. 10.) *E.'d* : *अनामिलितः (ता, तं).

ENAMOUR : Ph. *he is e.ed of her* अयमस्यामासक्तभावः, D. ; *I am e.ed of these books* *एतेषु पुस्तकेषु बद्धभावोऽस्मि.

ENCAGE : पञ्जरे रुणद्धि, नि-, अव-, सं-, (रुध्, c. 7.). [M. n.

ENCAMP (v. i.) : निविशते (विश्, c. 1.), *preparing to e.* निवेष्टुमुपचक्रमाणः,

ENCAMP (v. t.) : निवेशयति (c. of विश्), *e.ed the forces* : बलानि निवेशयामास, R.

ENCAMPMENT : निवेशः, R. v. 49. : V. CAMP.

ENCIENT : गर्भवती : V. PREGNANT.

ENCHAIN (v.) : (1) निगडैर्बध्नाति (बन्ध्, c. 7.) or संयच्छति (यम्, c. 1.) (lit.), K. ; (2) निगडयति (nomi.), D.

ENCHANT : I. Lit. : (1) वशीकरोति, Kuv. ; (2) साधयति (c. of सिध्), D. II. Fig. : *to e. the hearers* : श्रृण्वतां मनो हर्तुं, R. xv. 64. : v. TO CHARM, DELIGHT. *E.ing* : v. CHARMING.

ENCHANTER : I. A magician : (1) मायाविन् (m.) ; (2) मायाकारः. II. A charmer : मोहनः or -कः, वि-.

ENCHANTMENT : I. The act : वशीकरणम्, K. II. The practice : वश्यकर्मन्, (n.) D. s. III. Any thing enchanting : v. CHARMING.

ENCHANTRESS : (1) मोहिनी ; (2) मायाविनी (in bad sense).

ENCIRCLE : (1) परि-वेष्टयति (वेष्ट्, c. 10.), *e. whatever be on the side* : यत्पार्श्वतो भवति तत्परिवेष्टयन्ति, P. ; *to e. in the arms* : भुजाभ्यां परिवेष्टयति, D. ; (2) परिगच्छति (गम्, c. 1.) (= to go round), *e.d by the Vetravati* : वेत्रवत्या परिगता, K.

ENCLOSE (v.) : I. To surround : q. v. : परिवृणोति or वारयति (वृ, c. 5. or 10.), *e.d me with showers of arrows* : शरवर्षैर्मां पर्यवारयन्, Mab. II. To fence : q. v. : परिवृणोति. III. To shut up, confine : q. v. IV. To put in a case : सह प्रेरयति (ईर्, c. 10.) (= to send with).

ENCLOSURE : I. Fence : वृतिः, परि-, *e.s of parks* : उपवनवृतयः, Me. ; *over the e.s* वृतीनामुपरि, Si. II. That which is enclosed : *there were no e.s with the letter* *पत्रेण सहितं न किंचित् प्रेरितम्.

ENCOMIAST : v. EULOGIST.

ENCOMIASTIC,-AL : v. EULOGISTIC.

ENCOMIUM : स्तवः : v. EULOGY, PRAISE.

ENCOMPASS : परिवेष्टयति (वेष्ट्, c. 10.) : v. TO ENCIRCLE.

ENCORE : I. Adv. : पुनरभिनीयतां (?). II. Verb. : पुनरभिनीयतामिति वदति (वद्, c. 1.) (?).

ENCOUNTER (v. i.) : संगच्छते (गम्, c. 1.), *the two seas of armies e.ed* : सेनाम्भोधी समगच्छाते, Si. : v. TO MEET.

ENCOUNTER (v. t.) : I. To meet in opposition : (1) अभि-एति, आ-, (इ, c. 2.), *footmen e.ed footmen* : पत्तिः पत्तिमभीयाय रथाय, Ku. ; *horse e.ed horse* : वाहमेयाय वाजी, Si. ; (2) अभ्या-पतति (पत्, c. 1.), R. ; *of the two armies coming up to e. each other* संग्रामाय सन्निपततः सैन्ययुगस्य, Ku. ; (3) वि-गृह्णाति (ग्रह्, c. 9.) (=to fight), *for whom we have e.ed enemies* : यत्कृतेऽरीन् व्यगृह्णीम, B. II. To struggle with : q. v.

ENCOUNTER (subs.) : I. A meeting : अभ्यागमः. II. Conflict, battle : संयुगः, "*for fierce e.s fit*" सांयुगीनः (ना, नं), V.

ENCOURAGE : (1) साहसं जनयति (जन्, c. 10.) (with gen.) (=to embolden) ; (2) आश्वासयति (c. of श्वस्) (=to cheer) ; (3) प्रोत्साहयति (c. of सह्) (= to incite).

ENCOURAGEMENT : (1) आश्वासः,-सं, *it found no e. from the public* *साधारण्यादाश्वासं न लेभे ; (2) प्रोत्साहः,-हं, "*with good e.*" सुप्रोत्साहनेन.

ENCOURAGER : (1) आश्वासकः ; (2) प्रोत्साहकः.

ENCOURAGING : (1) आश्वासनः (नी, नं) ; (2) प्रोत्साहनः (नी, नं).

ENCROACH : (1) गृह्णाति (ग्रह्, c. 9.) (=to seize), *your house has been e.ed upon by another crocodile* : त्वदीयं गृहमपरेण मकरेण गृहीतं, D. ; (2) हरति (हृ, c. 1.) (=to take) ; (3) अन्यायेन प्रविशति (विश्, c. 6. (= to enter unlawfully) ; (4) न्यूनीकरोति (=to lessen).

ENCROACHMENT : (1) ग्रहणं (=seizing) ; (2) अन्यायप्रवेशः (=unlawful entry). Ph. *e. of a river* नदीसञ्चारः, Viv.

ENCRUST : V. TO INCRUST.

ENCUMBER : *thus e.ed by you on all sides* आर्येणैवं सर्वतो निरुद्धचेष्टाप्रसरस्य, Mu. ; *e.ed estate* ऋणग्रस्ता सम्पत्तिः : V. TO BURDEN.

ENCUMBRANCE : प्रतिबन्धः : V. IMPEDIMENT, BURDEN.

ENCYCLICAL : V. CIRCULAR, *e. letter* : *चक्रम्.

ENCYCLOPÆDIA : विद्याकोषः.

ENCYCLOPÆDIC,-AL : Ph. *of learning* विद्यासागरः.

END (subs.) : I. Extreme point : अन्तः, (rarely पर्यन्तः, प्रान्तः, उपान्तः), *at the e. of the journey* : अध्वनोऽन्ते, R. xvi. 35. ; *e. of a mantle* : अंशुकान्तः, J. II. Termination : (1) अन्तः or पर्यन्तः, *at the e. of the year* : संवत्सरस्यान्ते, Mat. ; *distressing in the e.* पर्यन्तपरितापिन् (f. नी), Ki. ; (2) अवसानम्, *at the e. of the day* : दिनावसाने, Sa. ; (3) परिणामः or परिणतिः, *pleasing in the e.* परिणामसुखः (खा, खं); Ki. III. Conclusion : (1) अन्तः, *at the e. of the sacrifice* : यज्ञान्ते, R. ; (2) अवसानम्, *at the beginning, middle, or e.* : आदौ मध्येऽवसाने वा, N. s. Ph. : *put an e. to* : समापयति (c. of आप्), Vi. IV. Death, destruction : q. v. : (1) अन्तः, *will surely meet his e.* अन्तमवाप्स्यति ध्रुवम्, Ku. xv. 42. ; (2) अवसानम्, *at the e. of the head-man* : मूलपुरुषावसाने, Sa. V. Aim, object : q. v. : आशयः. Ph. *to no e.* निरर्थकम् ; *to the e. that......* एतदभिप्रायकः (का, कं). VI. Remnant : अन्तः, *in the morning, giving its e.s to the servants* प्रत्यूषे तदन्तं कर्मकरान् दत्त्वा, P.

END (v. t.) : (1) अन्तं करोति (rare), *the e.er of Kshatryas* : क्षत्रियान्तकरः, Vi. ; (2) समापयति (c. of आप्) : V. TO FINISH, COMPLETE. Ph. *e.er of the e.er* (= death) अन्तकस्यान्तकः, Vi.

END (v. i.) : (1) expr. by subs., *this dynasty will e. in Sumitra* अयं वंशः सुमित्रान्तो भविष्यति, V. p. ; (*words*) *e.ing in the affix* ई *are feminine* ईप्रत्ययान्ताः स्त्री स्यात्, S. k. ; *whether it will e. auspiciously or otherwise* कल्याणी परिणतिरस्तु वान्यथा वा, Vi. ; (2) अवसीयते (pass. of सो) (rare), *it will e. so* एवं किलावसीयते, Vi.

ENDANGER : i. e. to bring into danger : expr. by subs., *it e.s my life* मम जीवितमनेन संशयमारोपितम् : V. DANGER.

ENDEAR : i. e. to make dear : V. DEAR and MAKE. *E.ing* : प्रीतिकरः (री, रं) ; मधुरः (रा, रं) (= sweet).

ENDEARMENT : i. e. blandishment : (1) हावः ; (2) विलासः.

ENDEAVOUR (v.) : (1) यतते (यत्, c. 1.) V. TO ATTEMPT ; (2) उद्यच्छति,-ते

(यम्, c. 1.), *e.ing to go* : उद्यच्छमाना गमनाय, R.; (3) व्यवस्यति (सो, c. 4.), *who would e. to separate her* : कस्तां पृथक्कर्तुं व्यवस्येत्, Mu.

ENDEAVOUR (subs.) : (1) उद्यमः; (2) व्यवसायः : v. ATTEMPT.

ENDING (subs.) : अन्तः : v. END ; TO END.

ENDIVE : शाकप्रभेदः.

ENDLESS : I. Without end : अनन्तः (न्ता, न्तं), *of e. prowess* अनन्तवीर्यः (र्या, र्यं), Ku. II. Without an object : निरर्थकः (का, कं).

ENDLESSLY : (1) अनन्तं v. INCESSANTLY ; (2) निरर्थकम् v. IN VAIN.

ENDORSE : I. In gen. sense : पृष्ठे लिखति, अभि-, (लिख्, c. 6.), *a debtor should e. payments on the bond* : लेख्यस्य पृष्ठेऽभिलिखेद्दत्त्वा दत्त्वा धनं ऋणी, Y. II. Fig. : of opinion etc. : कक्षीकरोति, D. s.

ENDORSEMENT : पृष्ठलिखितम्, *this is my e.* : *ममैतत् पृष्ठलिखितं or मयैतत् पृष्ठे लिखितम्.

ENDOW : I. Lit. : वृत्तिं ददाति (दा, c. 3.). II. To furnish with : योजयति (युज्, c. 10.). *E.ed with* : (1) अन्वितः (ता, तं), सम्-, *e. with reason* : विवेकसमन्वितः (ता, तं) ; (2) उपेतः (ता, तं), *e. with all good qualities* : सर्वगुणोपेतः (ता, तं) ; (3) युक्तः (क्ता, क्तं) : v. TO POSSESS.

ENDOWMENT : I. The act : वृत्तिदानम्. II. A settlement : वृत्तिः. III. Talent, gift : शक्तिः.

ENDUE : v. ENDOW.

ENDURABLE : सह्यः (ह्या, ह्यं) : v. TOLERABLE.

ENDURANCE : I. The habit of enduring : सहिष्णुता, प्र-, *e. of troubles* : क्लेशसहिष्णुता, Ka. II. The act of e. : (1) सहनम् ; (2) मर्षः,-र्षणं. III. Lastingness : स्थायित्वम्.

ENDURE (v. t.) : (1) सहते, वि-, प्र-, *all-e.ing* : सर्वंसहः (हा, हं) ; *I can not e. the slur* अहमयशो सोढुमीशे, R. ; *e.s to live* : जीवितुं विषहते, Ve. ; (2) मर्षयति or मृष्यति or मर्षति,-ते (मृष्, c. 10. 4. and 1.), *did not e. the horns* : शृङ्गं न ममर्ष, R.

ENDURE (v. i.) : तिष्ठति (स्था, c. 1.) : v. TO LAST, REMAIN.

ENDURING : i. e. lasting : स्थायिन् (f. नी), चिर-.

ENEMY : (1) शत्रुः, *who never made an e.* : अजातशत्रुः, Ve. ; *a prostrate e.:* चरणनिपतितः शत्रुः, Mr. ; (2) रिपुः, *attack on the e.s' side* : रिपुपक्षाभियोगः, Vi. ; (3) वैरिन् (m.), *great e.* : वैरिवरः, Ku. ; (4) अरिः, *to the e. of Namuchi* (i. e. Indra) : नमुचेररये, R. ; (5) अरातिः, *victory over the e.s* अरातिषु जयः, Ki. ; (6) द्विष्, विद्विष्, or द्विषत् (m.), *e.s of Gods* : देवद्विषः, Ku. ; (7) परः (an ambiguous term), *by stroger e.s* बलवत्तरैः परैः, Ku. ; (8) परिपन्थिन् (m.) rare) ; (9) शात्रवः (rare) : v. OPPONENT.

ENERGETIC : (1) वीर्यवत् (f. ती) (=strong, powerful) ; (2) तेजस्विन् (f. नी) (=spirited) : v. ACTIVE.

ENERGETICALLY : सोत्साहं (=eagerly) ; (2) सह तेजसा (=spiritedly) ; (3) वीर्यं समाश्रित्य (=vigorously) ; (4) अतन्द्रितं (=actively).

ENERGY : (1) तेजः v. SPIRIT ; (2) वीर्यं v. VIGOUR, STRENGTH ; (3) उद्योगः v. ACTIVITY.

ENERVATE (v.): (1) दुर्बलीकरोति ; (2) वीर्यं हरति (हृ, c. 1.) : v. TO WEAKEN.

ENERVATE,-D (adj.) : हतवीर्य (f. र्या) : v. WEAK.

ENERVATION : I. The act : (1) दुर्बलीकरणम् ; (2) वीर्यक्षयः. II. The state : (1) हतवीर्यता ; (2) निर्वीर्यता ; (3) क्लैब्यम्.

ENFEEBLE : दुर्बलीकरोति, *e. (the ministers) one by one* : एकैकं दुर्बलीकुरु, Mah. : v. FEEBLE, TO WEAKEN, EMACIATE, BREAK DOWN. *To became e.d* : दुर्बलीभवति.

ENFEEBLEMENT : I. The act : दुर्बलीकरणम्. II. Weakness : q. v. : दुर्बलता. [ददौ.

ENFEOFF : Ph. *e.ed this estate to me* *भाटकेन भूमिमिमां मां सम्पूर्णभोगाय

ENFEOFFMENT : expr. as above.

ENFORCE (v.) : I. To compel : q. v. II. To force : q. v. III.

To give force to : प्रबलयति (nomi.) ; प्रबलं (f. लां) करोति. IV. To carry out : अनुतिष्ठति (स्था, c. 1.). V. To confirm, support : q. v. : दृढयति (nomi.).

Enforcement : expr. by verb. : q. v.

Enfranchise (v.) : I. To release : q. v. : मोचयति (मोच्, c. 10). II. To naturalize : (1) पौराधिकारं ददाति (दा, c. 3.) (?) ; (2) पौरत्वं लम्भयति (c. of लभ्) (?). *E.d* : दत्तपौराधिकारः (रा, रं) (?).

Enfranchisement : I. Release : q. v. : मोचः. II. Admission to the freedom of a corporation : पौराधिकारदानं (?) ; पौरत्वप्रतिपादनम् (?).

Engage (v. t.) : I. To bind, pledge : q. v. : बध्नाति (बन्ध्, c. 7.). II. To enlist : perh. भाटयति (= to hire) ; उत्थापयति (c. of स्था) (= raise). III. To attract : q. v. : आकर्षति (कृष्, c. 1.). IV. To occupy, employ : q. v. : व्यापारयति (c. of वृ). *To be e.d* : व्याप्रियते (वृ, c. 6.). *E.d* : व्यापृतः (ता, तं) ; सव्यापारः (रा, रं), *in the day-time while e.* सव्यापारामहनि, Me. V. To encounter : q. v. : अभ्येति (इ, c. 2.).

Engage (v. i.) : I. To promise, undertake : q. v. : प्रतिशृणोति (श्रु, c. 5.). Ph. : *she is e.d to me* : मह्यं प्रतिश्रुता सा. II. To enter in : *when the ascetic e.d in fighting* : मुनौ रणमुपेयुषि, Ki. ; *e.d in meditation* : ध्याननिविष्टः (ष्टा, ष्टं) ; *while they were e.d in the controversy* : प्रवृत्ते च तयोर्वादे : v. TO BEGIN, ENTER.

Engagement : I. A battle : q. v. : युद्धम्. II. A promise to visit : Ph. *I have an e. today at his* : *अद्य तद्गृहगमनं मया प्रतिश्रुतम् ; *I could not keep my e.* *नाहं प्रतिश्रुतं रक्षितुं शशाक. III. Betrothal : प्रतिश्रुतसम्बन्धः IV. Business : q. v. : (1) व्यापारः ; (2) कार्यम् ; (3) कृत्यम्. V. Pledge : q. v. IV. An obligation : q. v. VII. The act of engaging : v. TO ENGAGE.

ENGAGING : (1) हृदयहारिन् (f. णी) : V. CHARMING ; (2) रम्यः (म्या, म्यं) V. PLEASANT, DELIGHTFUL.

ENGAGINGLY : expr. by adj. or verb : V. TO CHARM.

ENGENDER : जनयति : V. TO BEGET, PRODUCE.

ENGINE ; यन्त्रम्, *military e.* : युद्धयन्त्रम् ; *e.-driver* *यन्त्रवाहकः.

ENGINEER : वास्तुविद्याविशारदः (?) : V. E.ING.

ENGINEERING : वास्तुविद्या (?). *Civil e.* : पथप्रणाल्यादिनिर्म्माणविद्या (?). *Military e.* : वप्रपरिखादिनिर्माणविद्या (?). *Mechanical e.* : यन्त्रविद्या (?).

ENGLISH : इंलण्डीयः (या, यं) ; इंरेजः (जी, जं), *knows e.* *इंरेजीं जानाति.

ENGLISHMAN : *इंलण्डदेशीयः ; इंरेजः.

ENGRAFT : V. TO INGRAFT, GRAFT.

ENGRAINED : V. INGRAINED.

ENGRAVE : (1) मुद्रयति (मुद्र्, c. 10.), *with my name e.d on it* : मन्नामाक्षरमुद्रितः (ता, तं), A. r. ; (2) उत्किरति (कॄ, c. 6.), *with name e.d on the bezel* मणिबन्धनोत्कीर्णनामधेयः (या, यं), Sa.

ENRGRAVER : नामादिमुद्राकारिन् (f. णी) (?).

ENGRAVING : I. The art : नामादिमुद्राकर्मन् (n.) or -कला (?). II. A print : expr. by मुद्रितः (ता, तं) ; उत्कीर्ण (f. र्णा).

ENGROSS : I. To thicken : q. v. II. To copy in a large fair hand : स्पष्टाक्षरैः लिखति (लिख्, c. 6.) (?). III. To absorb : q. v. : Ph. *it e.es my mind* : त्वदासक्तं मे मनः. IV. To buy up : परिक्रीणीते (क्री, c. 9.). V. To assume : q. v.

ENGROSSER : I. A copyist : स्पष्टाक्षरलेखकः. II. A fore-staller : (1) परिक्रयिन् (f. णी) (?) ; (2) पूर्वक्रेतृ (f. त्री) (?).

ENGULF : (1) ग्रसते (ग्रस्, c. 1.) (= to swallow) ; (2) प्लावयति (c. of प्लु) (= to drown).

ENHANCE : वर्द्धयति (c. of वृध्) : V. TO INCREASE.

ENHANCEMENT : वृद्धिः : V. INCREASE.

ENHARMONIC : ऐकतानिकः (की, कं) (?).

ENIGMA : प्रहेलिका : v. RIDDLE.

ENIGMATIC,-AL : वक्रः (क्रा, क्रं) : v. OBSCURE, AMBIGUOUS.

ENIGMATICALLY : वक्रं : v. AMBIGUOUSLY.

ENJOIN : I. To order : q. v. : शास्ति (शास्, c. 2.). II. To prohibit or restrain : q. v. : निषेधति (सिध्, c. 1.).

ENJOY : I. Lit. : (1) भुनक्ति or भुंक्ते, उप-, सं-, परि-, अनु-, अधि-, (भुज्, c. 7.), *e. my milk* : पयो मदीयमुपभुंक्ष्व, R. ; *e.s the kingdom of heaven* : भुनक्ति स्वाराज्यम्, Ana. ; (2) अनुभवति (भू, c. 1.) (prop. to feel), *e.ing all pleasures* : सर्वसुखान्यनुभवन्तः, K. ; (3) निर्विशति (विश्, c. 6.), *e. the beauties of youth* : यौवनश्रीर्निर्विश्यतां, R. II. Carnally : भुनक्ति, उप-, P.

ENJOYMENT : भोगः, उप-, सं-, परि-, *the desire of e. is over* निवृत्ता भोगेच्छा, J. ; *what an e. in those places* स सम्भोगो यत्तादृशेषु प्रदेशेषु, V.

ENKINDLE : संधुक्षयति (धुक्ष्, c. 10.) : v. KINDLE.

ENLARGE (v. t.) : I. In gen. : (1) वर्धयति (c. of वृध्) v. TO INCREASE ; (2) विस्तारयति (c. of स्तृ) v. TO EXTEND. II. To release : q. v. : मुञ्चति (मुच्, c. 6.).

ENLARGE (v. i.) I. Lit : वर्धते (वृध्, c. 1.), *the fish e.d there* : स तत्र ववृधे मत्स्यः, Mah. : v. TO INCREASE, EXTEND. II. To e. upon : प्रपञ्चयति (पञ्च्, c. 10.), *now we will e. on its different states* : इदानीं तस्यैतावस्थाभेदः प्रपञ्च्यते, S. : v. TO DETAIL.

ENLARGEMENT : I. Extension, expansion : q. v. : वृद्धिः, वि-, R. II. Release : q. v. : मोक्षः. III. Expatiation : विस्तारः.

ENLIGHTEN : I. To lighten : q. v. : दीपयति (c. of दीप्). II. To instruct : ज्ञानं ददाति (दा, c. 3.) (=to give knowledge) ; (2) चक्षुरुन्मीलयति (c. of मील्) (= to open the eyes) ; (3) उद्भासयति (c. of भास्) (rare).

ENLIGHTENED : perh. उद्भासितः (ता, तं) : v. EDUCATED.

ENLIGHTENMENT : perh. संविद्, *the Lord of e.* संविदामीशः, Ki. : v. REFINEMENT, CIVILIZATION.

ENLIST : (v. t.) : I. To enroll : q. v. : (1) गृह्णाति (ग्रह्, c. 9.) (=to take) ; (2) उत्थापयति (c. of स्था) (=to raise). II. To gain over : perh. निवेशयति (c. of विश्) or ग्राहयति (c. of ग्रह्), *I will e. them in the cause of truth* : *तान् सत्यार्थे निवेशयामि or सत्यपक्षं ग्राहयामि.

ENLIST (v. i.) : I. To engage in : विशति, प्र-, (विश्, c. 6.). II. To enter heartily in a cause : निविशते, अभि-, (विश्, c. 6.).

ENLISTMENT : I. The act : v. TO ENLIST. II. A writing : *प्रवेशपत्रम्.

ENLIVEN : (1) उत्तेजयति (c. of तिज्) (=to excite : q. v.); (2) हर्षयति (c. of हृष्) (=to gladden : q. v.).

ENLIVENING : हर्षजननः (नी, नं) : v. JOYFUL.

ENMITY : (1) वैरम्, *should not make e. with any one* न......वैरं कुर्वीत केनचित्, B. p. ; *e. towards Udaraka* : उदारके वैरम्, D. II. ; (2) शत्रुता ; (3) विद्वेषः ; (4) शात्रवम् ; (5) दौहृदं (rare) ; (6) विरोधः (=feud).

ENNOBLE : I. To dignify : (1) उन्नमयति (c. of नम्) ; (2) उत्-कर्षति, प्र-, (कृष्, c. 1.) ; (3) उत्-श्राययति (c. of श्रि). II. To raise to the nobility : *अनुराजं or अध्यार्यं करोति.

ENNUI : खेदः : v. WEARINESS.

ENORMITY : I. Greatness : घोरता. II. Anatrocious crime : q. v. : घोरपातकम्.

ENORMOUS : I. Inordinate : असाधारण (f. णी). II. Great : (1) महाप्रमाण or बृहत्प्रमाण or अतिप्रमाण (f. णा) (=of e. size) ; (2) विशाल: (ला, लं) (=large : q. v.) III. Atrocious : q. v.

ENORMOUSLY : अत्यन्त- in comp. : v. EXCEEDINGLY.

ENOUGH : (1) अलम्, *all this is not e. for one* : सर्वं तन्नालमेकस्य, Mah. ; *e. of this story* : अलमनया कथया, K. ; (2) पर्याप्तः (प्ता, प्तं), *I am e. for all the Rakshashas in battle* : सर्वेषामेव पर्याप्तो राक्षसानामहं युधि, Ram. ;

and so much fuel is e. for cooking so much food : इयतश्चौदनस्य पाकायैतावदिन्धनं पर्याप्तम्, D. ; (3) प्रचुरः (रा, रं) (=abundant). Ph. *and I have not had e. of (lit. not satiated with) youth* न च तृप्तोऽस्मि यौवने, Mat. ; *more than e. for hundred years consumption* वर्षशतोपभोगेऽप्यक्षय्यम्, D.

Enquire : I. To ask : q. v. : अनुयुंक्ते (युज्, c. 7.), *e.d of him what was to be given and how much* : किं प्रदेयं कियद्वेति तमन्वयुंक्त, R. II. To seek to know : जिज्ञासते, *we will now e. into the nature of spirit* : प्राणः किंस्वरूप इतीदानीं जिज्ञास्यते, S. III. To examine, consider : q. v. : अनुसन्दधाति or धत्ते (धा, c. 3.), *personally e.d into the disputes* : विवादान् स्वयमनुसन्दधौ, M. n.

Enquiry : I. Asking : अनुयोगः, *whoever I may be (you) should make no e.* : यास्मि साऽस्म्यनुयोगो मे न कर्तव्यः, Mah. II. Seeking to know : जिज्ञासा, *e. after duties* : धर्मजिज्ञासा, M. d. ; *a subject of e.* : जिज्ञास्यम्, S. III. Examination, consideration : q. v. : अनुसन्धानम्.

Enrage : (1) कोपयति, प्र-, सं-, (c. of कुप्), *I will e. him* : कोपयाम्येनम्, B. r. ; (2) क्रोधयति (c. of क्रुध्) ; (3) रोषयति (c. of रुष्) ; (4) कोपं जनयति (c. of जन्) ; (5) क्रोधम् उत्पादयति (c. of पद्), K. ; (6) संरम्भं नयति (नी, c. 1.), R. ; etc.

Enraged : (1) क्रुद्धः (द्धा, द्धं) ; (2) कुपितः (ता, तं) ; (3) रुष्टः (ष्टा, ष्टं) ; (4) संरब्ध (f. ब्धा) ; (5) जातामर्षः (र्षा, र्षं) ; (6) आगतमन्यु (mfn.) ; etc. *To be e.* : (1) कुप्यति (कुप्, c. 4.) v. ANGRY, TO BE- ; (2) क्रोधम् एति (इ, c. 2.) ; (3) मन्युं प्राप्नोति (आप्, c. 5.), Vi. ; etc.

Enrapture, Enravish : प्रहर्षयति (c. of हृष्) : v. TO CHARM.

Enravishingly : प्रहर्षं जनयत् (f. न्ती).

Enrich : I. Lit. : धनिनं (f. नीं) or धनशालिनं (f. नीं) करोति : v. RICH ; TO MAKE. II. To adorn : q. v. : अलङ्करोति (c. of अलङ्क). III. To fertilize : q. v.

ENRICHMENT : expr. by circum. : v. TO ENRICH.

ENROLL (v.) : I. To enlist : *निवेशपत्रिकायां नाम निवेशयति (c. of विश्). II. To record : q. v. III. To envelop : q. v.

ENROLLMENT : I. The act : *नामनिवेशनम्. II. A register : *निवेशपत्रिका.

ENROOTED : (1) बद्धमूल: (ला, लं) ; (2) रूढमूल: (ला, लं).

ENSAMPLE : निदर्शनम् : v. EXAMPLE.

ENSANGUINED : (1) रुधिरसंलिप्त: (प्ता, प्तं) ; (2) शोणिताक्त (f. क्ता) ; (3) असृग्दिग्ध (f. ग्धा) ; etc.

ENSCONCE : लीयते (ली, c. 4.) : v. TO HIDE.

ENSHRINE : I. Lit. : v. SHRINE ; TO ENCLOSE. II. To cherish : रक्षति (रक्ष्, c. 1.).

ENSIGN : I. A banner : q. v. : पताका. II. A standard-bearer : (1) पताकिन् (m.) ; (2) वैजयन्तिक:.

ENSLAVE : दासीकरोति, *one who has e.d the whole of the three worlds* दासीकृताशेषजगत्त्रय: (या, यं), Ku. ; *there is none whom the good qualities of Kadambari do not e.* : कादम्बर्या गुणा न कञ्चिन्न दासीकुर्वन्ति, K. *To become e.d* दासीभवति.

ENSLAVEMENT : I. The act : दासीकरणम्. II. The state : दास्यम् : v. SLAVERY.

ENSNARE : पाशेन बध्नाति (बन्ध्, c. 9.) or पाशे पातयति (c. of पत्) (lit. and fig.). *To be e.d* : पाशे पतति (पत्, c. 1.) (lit. and fig.).

ENSUE : अनुवर्तते : v. TO FOLLOW. *E.ing* : v. FOLLOWING.

ENSURE, ENSURER : v. INSURE, INSURER.

ENTABLATURE, ENTABLEMENT : *स्तम्भशिर:शाखा.

ENTAIL (subs.) : I. An estate : *अनुच्छेद्यसम्पत्ति:. II. Its rule : [*अनुच्छेदनियम:.

ENTAIL (v.) : I. Lit. : to settle unalienably : *अनुच्छेदनियमेन बध्नाति (बन्ध्, c. 9.). II. Fig. to bring on : आवहति (वह्, c. 1.).

ENTANGLE : I. Lit. : ज(झ)टयति (c. of जट्) (used in Bengali). *To be e.d* : ज(झ)टति (जट् or झट्, c. 1.). Ph. *e.d in the bracelets of creepers* प्रततिवलयासङ्गसञ्जातपाशः, Sa. II. To embarass, puzzle : q. v. q. v. : प्रमुग्धता.

ENTANGLEMENT : I. Lit. : v. TO ENTANGLE. II. Embarassment :

ENTER (v.) : I. In gen. : विशति, प्र-, (rarely आ-, समा-,) (with acc.) or निविशते (with loc.) (rare) (विश्, c. 6.), *e.ed the house of Vasantasena* : वसन्तसेनागृहं प्रविष्टः, Mr. II. ; *if a Suka thorn e.s the foot* : निविशते यदि शुकशिखा पदे, N. IV. II. ; *e.ed the hearts of the ascetics* : तपोभृतां हृदयानि समाविवेश, Ki. ; *you e. [on your story]* : भवभवान् प्रविशतु, D. v. v. TO BEGIN ; *you have e.ed into the sixth year (of your school life)* : प्रविष्टोऽसि षष्ठं वर्षम्, K. v. TO ATTAIN ; *e.ed into reflection* : चिन्तां विवेश, K. ; *e.ed into combat* : प्राविशतां रणे, B. p. v. TO ENGAGE IN. Ph. : *to e. into an alliance* : सन्धिं करोति, Ve. II. To make an entry of : निवेशयति, सं-, (c. of विश्), *should e. (his) name with (his) own hand* : नाम स्वहस्तेन निवेशयेत्, Y. ; (2) लिखति (= to write q. v.).

ENTERPRISE (subs.) : I. A (bold) undertaking : (1) उद्यमः v. ATTEMPT ; (2) अवदानं (=achievement) ; (3) साहसं (often in bad sense). II. Energy : q. v. : उद्यमः, *a man of great e.* : महोद्यमः पुरुषः.

ENTERPRISE (v.) : आरभते (रभ् c. 1.) : v. TO BEGIN, UNDERTAKE.

ENTERPRISING (adj.) : (1) उद्योगिन् (f. नी) ; (2) अध्यवसायिन् (f. नी) : v. ACTIVE, BOLD.

ENTERTAIN (v.) : I. To maintain : q. v. II. To receive quests : शुश्रूषते (desi. of श्रु) ; (2) पूजयति (पूज्, c. 10.) (= to honor : q. v.). Ph. : *then we are ready to e. you* : ततः सज्जातिथेया वयम्, Vi. II. To amuse : q. v. : जुषते (जुष्, c. 6.), *e. us* : जुषस्व नः, Vi. IV. To

accept: q. v.: परिगृह्णाति (ग्रह्, c. 9.). V. To cherish: करोति, *to e. a hope*: आशां करोति.

ENTERTAINER: I. A host: q. v.: शुश्रूषाकारिन् (f. णी). II. An amuser: q. v.: विनोदकः. III. A cherisher: expr. by circum.

ENTERTAINING (adj.): (1) विनोदिन् (f. नी) (= amusing); (2) हास्यकरः (री, रं) (= exciting laughter).

ENTERTAININGLY: (1) विनोदं विदधत् (f. ती); (2) हास्यं जनयत् (f. न्ती).

ENTERTAINMENT: I. Hospitality: q. v.: (1) शुश्रूषा; (2) पूजा. II. A feast: उत्सवः. III. Amusement: q. v.: विनोदः.

ENTHRALL: दासीकरोति: V. TO ENSLAVE.

ENTHRONE: (1) अभिषिञ्चति (सिच्, c. 6.); (2) सिंहासने निवेशयति (c. of विश्) (only of kings): V. TO PLACE; THRONE.

ENTHRONEMENT: (1) अभिषेकः; (2) सिंहासननिवेशनम् (only of kings).

ENTHUSIASM: I. Frenzy, fanticism: धर्मोन्मादः (?). II. Warmth, zeal: q. v.: अत्युत्साहः.

ENTHUSIAST: I. A fanatic: धर्मोन्मत्तः (त्ता, त्तं) (?). II. In gen. sense: perh. उन्मत्तः (त्ता, त्तं), *e.s about war*: युद्धोन्मत्ताः; अत्युत्साहवत् (f. ती). V. ZEALOUS.

ENTHUSIASTIC,-AL: (1) व्यग्रः (ग्रा, ग्रं) (= eager, zealous); (2) उन्मत्तः (त्ता, त्तं) (= mad); (3) प्रचण्डः (f. ण्डा) (= impetuous). Ph. *e. devotion* निरतिशयभक्तिः: V. EXTREME.

ENTHUSIASTICALLY: (1) निरतिशयं (= extremely); (2) सोत्साहम् (= eagerly); (3) सोन्मादम् (= madly).

ENTHYMEME: उपनयाद्विगमनम्.

ENTICE (v.): (1) हरति (हृ, c. 1.) (= to allure: q. v.), *not e.d by other temtations*: अहृतस्य विलोभनान्तरैः, R.; (2) प्र-, लोभयति, वि-, (c. of लुभ्) (= to tempt: q. v.), *if any one e.s and defiles this girl*: यदि कश्चिदेनां बालां विलोभ्य नाशयिष्यति, D.

ENTICEMENT : I. The act : (1) हरणम्; (2) प्र-लोभनम्, वि-. II. Alluring object : प्र-लोभनम्, वि-.

ENTICER : प्रलोभकः : v. TEMPTER.

ENTICING : v. ALLURING ; CHARMING.

ENTICINGLY : (1) प्रलोभ्य, वि-; (2) मनो हृत्वा.

ENTIRE : I. Complete, whole : q. v. : (1) कृत्स्न (f. त्स्ना) ; (2) समग्रः (ग्रा, ग्रं) ; (3) अखण्डः (ण्डा, ण्डं) ; (4) अविकलः (ला, लं) ; (5) निखिलः (ला, लं); (6) अखिलः (ला, लं) ; (7) समस्तः (स्ता, स्तं). II. Not gelded : q. v. : prob. अविकलः (ला, लं).

ENTIRELY : I. Completely : q. v. : (1) कार्त्स्न्येन ; (2) साकल्येन ; (3) समग्रम् ; (4) अखण्डम् ; (5) सर्वथा (=altogether) ; (6) by adj. II. Solely : comp. with एक, *whose life depends e. on water* : जलैकायत्तजीवितः (ता, तं), M. n. ; *of e. peaceful character* शमैकवृत्ति (mfn.), Ki.

ENTIRENESS, ENTIRETY : (1) कार्त्स्न्यम् ; (2) साकल्यम् ; (3) समग्रता ; (4) सम्पूर्णता : v. ENTIRE.

ENTITLE (v) : I. To call, name : q. v. : (1) अभिदधाति (धा, c. 3.) ; (2) उदाहरति (हृ, c. 1.). II. To give a claim to : expr. by अधिकारः or अर्हति (अर्ह्, c. 1.) or -भाज् (mfn.) in comp., *who are not e.d to share* : विभागानधिकारिणः, Mit. ; *how is the youngest e.d to the kingdom in preference to the eldest* : कथं ज्येष्ठमतिक्रम्य कनीयान् राज्यमर्हति, Mat. ; *in the absence of the former, the latter is e.d the property* : पूर्वस्याभावे धनभागुत्तरः, Y.

ENTITY : (1) सत्, G. ; (2) भावः, G.

ENTOMB : निदधाति (धा, c. 3.) (= to bury).

ENTOMBMENT : e. i. burial in a tomb : v. BURIAL, TOMB.

ENTOMOLOGIST : *कीटविज्ञानविद् (mfn.), -विशारदः (दा, दं).

ENTOMOLOGY : *कीटविज्ञानम् ; कीटविद्या.

ENTOZOON (pl. zoa) : *अन्तर्जीवः.

ENTRAIL : (1) अन्त्रम् ; (2) पुरीतत् (n.) (rare).

ENTRANCE (subs.) : I. The act or right of entering : प्रवेशः,-नं, *for our e.* : अस्माकं प्रवेशाय, V. p. ; *give me e.* : देहि मे प्रवेशम्, Mu. ; *e.-fee* : *प्रवेशनशुल्कम्. II. A place for e. : प्रवेशः, *at the e. of a certain town* : कस्यचिन्नगरस्य प्रवेशे, P. IV. 6. : V. DOOR, PASSAGE.

ENTRANCE (v.) : I. To put in a trance : मोहं जनयति (जन्, c. 10.), उत्पादयति (c. of पद्), etc. *E.d* : मोहाविष्टः (ष्टा, ष्टं) ; मोहाधिष्ठितः (ता, तं). II. To enrapture : प्रहर्षयति (c. of हृष्).

ENTRAP : (1) बध्नाति (बन्ध्, c. 9.) (when the meaning is clear), *by means of nets, hooks, and other devices for e.ping fish* जालवडिश-प्रभृतिभिर्मत्स्यबन्धनोपायैः, Sa. v. ; (2) पाशे पातयति (c. of पत्) : V. TO ENSNARE.

ENTREAT : उपच्छन्दयति (छन्द्, c. 10.), R. v. 58 : V. TO BEG, IMPLORE.

ENTREATY : (1) अभ्यर्थना or प्रार्थना, *by e.s, by advices* : अभ्यर्थनाभिरुपदेशैश्च, K. ; (2) याञ्चा V. REQUEST.

ENTREPOT : वाणिज्यस्थानम् (?).

ENTRUST (v. t.) : निक्षिपति (क्षिप्, c. 6.), *should e. all work to him* : तस्मिन् सर्वकार्याणि निक्षिपेत्, M. VII. 59. ; *is the secret kept you were entrusted with* रक्ष्यते भवता रहस्यनिक्षेपः, V. II. ; (2) न्यस्यति, वि- (अस्, c. 4.) or न्यासीकरोति (with sim. cons.), *e.ing wife to sons* सुतविन्यस्तपत्नीकः, Y. ; (3) नि-दधाति or धत्ते (धा, c. 3.) (with sim. cons.), K. b. ; (4) निवेशयति (c. of विश्) (rare), *all work was e.ed to you* : त्वयि निवेशितसर्वकार्यः, Mu. v.

ENTRY : I. The act of entering : प्रवेशः,-नं, *on (your) e.* : प्रवेशे, R. VI. 24. ; *getting an e. with difficulty* : कथमपि लब्धप्रवेशः, Va. II. A passage for entering : प्रवेशः : V. ENTRANCE (II), PASSAGE. III. That which is entered : expr. by verb : *this is an erroneous e.* : *इदमभ्रमान्निवेशितम् ; *to make an e. of* : V. ENTER (II).

ENTWINE (v.) : परि-वेष्टयति (वेष्ट्, c. 10.) (= to encircle, surround : q. v.).

ENUMERATE : I. To count : संख्याति (ख्या, c. 2.). II. To recount, mention : q. v. : आख्याति (ख्या, c. 2.), *e. the kings of England* : *इंग्लण्डेश्वराणां नामानि कथय.

ENUMERATION : आख्यानम् : v. MENTION, RECITAL.

ENUNCIATE : I. To predicate : लक्षणं or रूपं कथयति (कथ्, c. 10.). II. To pronounce : q. v. : उच्चारयति (c. of चर्).

ENUNCIATION : I. Predication : लक्षण- or रूपकथनम्. II. Mode of utterance : उच्चारणम्. III. A declaration : उक्तिः.

ENVELOP (v.) : (1) गुण्ठयति, अव-, (गुण्ठ्, c. 10.) (= to veil), *e.ed in nocturnal darkness* : रजनीतिमिरावगुण्ठितः (ता, तं), Ku. ; (2) परि-वृणोति or वारयति (वृ, c. 5. and 10.) (= to enclose), *e.ing the whole Lanká* : लङ्कां समस्तां परिवार्य, Ram. : v. also TO ENCIRCLE, CONCEAL.

ENVELOPE (subs.) : *पत्रवेष्टनम्.

ENVENOM (v.) : I. Lit. : विषेण लिम्पति (लिप्, c. 6.) or देग्धि (दिह्, c. 2.) or अनक्ति (अञ्ज्, c. 9.). II. Fig. : *e.ed glance* विषेण दिग्धः कटाक्षः, Ma. ; *"e.ed tongue of calumny"* विषात्मा पिशुनजिह्वा.

ENVIABLE : स्पृहणीयः (या, यं), *of e. prowess* स्पृहणीयवीर्यः, Ku. III. 20.

ENVIER : (1) ईर्ष्यिन् (m.) ; (2) असूयकः ; (3) मत्सरिन् (m.).

ENVIOUS : (1) ईर्ष्यिन् (f. णी), *e., hateful, discontented* ईर्ष्यी घृणसन्तुष्टः, H. ; (2) मत्सरिन् (f. णी), *e. of others' rise* : परवृद्धिमत्सरिन् (f. णी), Si. ; (3) साभ्यसूयः (या, यं) ; (4) ईर्ष्यालु (mfn.) ; (5) असूयापरीतः (ता, तं) ; etc.

ENVIOUSLY : (1) सेर्ष्यम् ; (2) साभ्यसूयम् ; (3) समत्सरम्.

ENVIOUSNESS : v. ENVY.

ENVIRON (v.) : परिवृणोति (वृ, c. 5.) : v. ENCOMPASS.

ENVIRONS : परिसराः or परिसरविषयाः (m. pl.) : v. SUBURBS.

ENVOY : दूतः : v. AMBASSADOR.

ENVY (subs.) : (1) ईर्ष्या v. JEALOUSY ; (2) अभि-असूया, *who has crea-*

ted your e. केनाभ्यसूया ते जनिता, Ku.; (3) मात्सर्यम्, *whose minds are vitiated with the feeling of e.* मात्सर्यरागोपहतात्मन् (mfn.), Ki.

Envy (v.): I. In bad sense: (1) असूयति, अभि-, (nomi.) (with dat.); (2) ईर्ष्यति (ईर्ष्, c. 1.) (rare: with dat.); (3) better by subs. II. In good sense: स्पृहयति,-ते (स्पृह्, c. 10.) (with dat.), *I e. the King Dasaratha*: स्पृहयामि राज्ञे दशरथाय, Vi.

Epact: *annual e.* सूर्यचन्द्रवत्सरान्तरम्; *monthly e.* अर्कचन्द्रमासान्तरम्.

Epaulet: स्कन्धाभरणम्, and sim. comp.s (?).

Ephemeral: I. Diurnal: q. v. II. Short-lived: क्षणभङ्गुरः (रा, रं): v. transient.

Ephod: परिकरः (?): v. girdle.

Ephor: *परिदर्शकः. *E.-alty*: *परिदर्शकत्वम्.

Epic: Ph. *e. poem* महाकाव्यम्; *e. poet* महाकाव्यलेखकः, etc.

Epicene: स्त्रीपुंलिङ्गः (ङ्गा, ङ्गं).

Epicure: भोजनचञ्चुः, Vet.: विषयासक्तचेतस् (mfn.) (=sensualist: q. v.).

Epicurian: I. Lit.: *एपिक्यौरीयः (या, यं). II. Luxurious: विशिष्टः (ष्टा, ष्टं). III. Given to indulgence: (1) इन्द्रियसुखनिरतः (ता, तं); (2) विषयासक्तः (क्ता, क्तं).

Epidemic: I. Adj.: व्यापक (f. पिका). II. Subs.: व्यापकव्याधिः; मारिः (=pestilence).

Epiglottis: उपजिह्वा; प्रतिजिह्वा; अलिजिह्वा.

Epigram: क्षुद्रकविता (?).

Epigrammatic,-al: I. Lit.: expr. by comp. II. Concise, pointed: q. v.: लघु (mfn.).

Epigrammatist: क्षुद्रकवितालेखकः (?).

Epilepsy: (1) अपस्मारः; (2) भ्रामरम्.

Epileptic: (1) अपस्मारिन् (f. णी), Si.: (2) भ्रामरिन् (f. णी).

